आरण्यकम् (XXV/1) मार्च 2017
अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

## अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्

**(Bi-annual Refereed Sanskrit Research Journal)**

### संस्कृतप्रसारपरिषद्
### आरा (विहारः)

पञ्चविंशं वर्षम्, प्रथमोऽङ्कः
मार्च 2017

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्

वर्षाङ्कौ - पञ्चविंशं वर्षम्, प्रथमोऽङ्कः

**चैत्रः, वि.सं.२०७४**

**मार्च, २०१७**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - ५० रूप्यकाणि* *वार्षिकं शुल्कं १०० रूप्यकाणि*
*संयुक्ताङ्कः - १०० रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पेरिस् (फ्रान्स्)

❀

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com

❀

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

अग्निः व्यापकः,धूमो व्याप्यः। मनुष्यत्वं व्यापकम्, द्विजत्वं व्याप्यम्। पशुत्वं व्यापकम्, गोत्वं व्याप्यम्। व्याप्यधर्मेण व्यापकधर्मो न विहन्यते। कश्चिद् द्विजः भूत्वापि मनुष्यत्वं न जहाति, काचिद् गौः पशुत्वं परित्यक्तुम् अशक्तैव। व्यापकेभ्यः जातिगुण-क्रिया-संज्ञाभिः कारणैः व्याप्यस्य कस्यचित् पृथक्करणं निर्धारणमिति उक्तं महर्षिपाणिनिना। यत इदं निर्धारणं ततः षष्ठीसप्तम्यौ स्तः। तद्यथा-**यतश्च निर्धारणम्** (२.३.३१)। ''जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। यतो निर्धारणम्, ततः षष्ठीसप्तम्यौ विभक्ती स्तः। मनुष्याणां क्षत्रियः शूरतमः, मनुष्येषु क्षत्रियः शूरतमः। (काशिका, २.३.४१)

एवमेव व्यापकः समुदायांशविशेषं व्याप्नोति, व्याप्यः तत्समुदायस्यैकदेशव्यापी भवति। गोत्वाभिसम्बन्धात् गौः एकः पशुविशेष इति परिचीयते। तेन गोत्वाख्यव्याप्यधर्मेण न केवलं गोः पशुविशेषरूपेण निश्चयो भवति, अपि तु एतेन एव इतरेभ्यः अज-वानर-महिषादिभ्यः गोः भेदनिश्चयोऽपि भवति अर्थात् विशेषणधर्मः गोत्वं तद्भिन्नाद् अजत्व-महिषत्वादेः गावं व्यावर्तयत्यपि। किन्तु स्वस्मिन् विद्यमानं पशुत्वधर्मं व्याहन्तुं न यतते तत् कर्तुं, नापि शक्नोति। व्यापकधर्मः एकं व्याप्यम् अतिरिच्य व्याप्यान्तरं व्याप्नोति, तद्यथा पशुत्वं गावम् अतिरिच्य अजं वानरं महिषं वा व्याप्नोति। किन्तु एकः व्यापकः ततोऽपि व्याप्त्यधिकवतो दृष्ट्या व्याप्योऽपि भवति। तद्यथा गोत्वं व्याप्यं पशुत्वं च व्यापकम्, किन्तु प्राणित्वं व्यापकं चेत् पशुत्वं व्याप्यं भवति, पशुत्वापेक्षया मनुष्यत्वादौ अपि प्राणित्वस्य व्याप्तेः सुलभत्वात्। एतेन हेतुना देवदत्तः पुरुषः पुरुषत्वधर्मावच्छिन्नोऽतः पुरुषत्वं व्याप्यो धर्मः।

एवमेव एकस्मिन् आधारे अनेके व्याप्या व्यापकाश्च धर्माः तिष्ठन्ति। तद्यथा-घटे घटत्वं भवति, घटत्वापेक्षया व्यापको धर्मः द्रव्यत्वमपि तत्र भवति, किं च द्रव्यत्वापेक्षया पदार्थत्वं व्यापको धर्मस्तत्र भवति। तद्वत् बिहारनिवासिनि देवदत्ते यथा बिहारित्वं भवति, तथा तदपेक्षया व्यापको धर्मः भारतीयत्वमिति तस्मिन् भवति, तदपेक्षया विश्वनिवासित्वमिति व्यापको धर्मो भवति। यदा देवदत्तः केवलम् आत्मानं देवदत्तं परामृशति, तदा आत्मनः सुखं दुःखं स्वभावं स्वप्नं वा विमृशति, किन्तु तत ऊर्ध्वं यदा आत्मनि बिहारित्वं विचारयति, तदा बिहारप्रान्तस्थं सांस्कृतिकं वैशिष्ट्यम्, अन्नादेः वैपुल्यम्, स्वपितृमातृबन्धुस्वजन-



परिजनादीनाम् आत्मनोऽभ्युदये भूमिकादि विमृश्य एतया व्याप्त्या आत्मनः समृद्धं गौरवम् अनुभवति। किं च यदा देवदतः आत्मनि विद्यमानं भारतीयत्वं विवेचयति तदा एतस्याः गौरवशालिन्याः आर्षभूमेः सन्तानरूपेण स्वात्मनि अमृतपुत्रत्वानुभूत्या विशिष्टामानन्दानुभूतिं संप्राप्नोति, तथा च अस्य राष्ट्रस्य सम्मानाय अभ्युदयाय च आत्मत्यागमपि विधातुम् उत्सहते। एवमेव यदा देवदत्तः विश्वनिवासित्वं समीक्षते तदा स्वस्मिन् अखिलायाः मनोरमायाः अस्याः वसुन्धरायाः सन्ततित्वेन वसुधायां विद्यमानानां चराचराणां कल्याणाय वसुधायाः संरक्षणाय च सततं यतितुकामो भवति। अनया रीत्या यथा यथा देवदत्तः आत्मनि व्याप्यापेक्षया व्यापकधर्मान् विमृशति, तथा तथा सः आत्मनः विस्तृतिं व्यापकतां च अनुभवति, किं च तथा तथा स्वात्मनि कदाचिद् उत्पन्नां संकीर्णाभावनां हीनभावनां वाऽपाकर्तुं प्रभवति तथा च तत्तद्विशालरूपस्यांशं रूपेणात्मानं विमृश्य तत्तदव्याप-करूपस्वातन्त्र्यस्य संरक्षणाय आत्मनः त्यागपूर्णायाः भूमिकायाः स्वरूपम् आकलयति। एवं च स्वात्मनि प्राप्यमाणस्य स्वल्पपरिमितस्य सुखस्यापेक्षया समधिकं संव्याप्तं च सुखमवाप्नोति। अत एवोक्तमस्ति- 'भूमा एव सुखम्। नाल्पे सुखमस्ति' इति। एतस्याः भूमसुखावाप्तेः प्रतिनिधिभूतं स्वरूपं वयं स्वस्य पारिवारिकजीवने द्रष्टुं शक्नुमः। तत्र वयं भोज्यपदार्थप्रसङ्गे वस्त्रधारणादिप्रसङ्गे वा स्वस्य रुचिम् अरुचिं वा अपरिगणय्य पितामह-पितामह्यादेरारभ्य लघून् शिशून् यावत् सर्वेषां रुच्यनुकूलतापूर्तये यतमानाः भवामः।

संस्कृतजगत्यपि अनुरूपा अनुभवाः सुतरां समीक्ष्याः सन्ति। यदा कश्चिच्छात्रः पारम्परिकशैल्या कस्याश्चित् संस्थायाः किमपि व्याकरणन्यायमीमांसादिशास्त्रम् अधीयानो भवति तदा सः तत्प्रान्तगततत्संस्थाविशेषान्तर्गतद्विषयानुबद्धत्वम् आत्मनः पश्यति, किन्तु समकालमेव अखिलेऽस्मिन् राष्ट्रे राष्ट्रान्तरे वा तं विषयमधिकृत्य विविधासु संस्थासु अधीयाना शतशः सहस्रशः वा भवन्तीत्यतः तैः साकमात्मनः स्वाभाविकं व्यापकीभूतम् अन्वयन् अनुभूय व्यापकतरं सुखमवाप्तुं स क्षमो भवति। तद्वत् आधुनिकसंस्थासु संस्कृतभाषासाहित्यमाश्रित्य अधीयानानां छात्राणामपि आत्मनः विपुलसंख्याकेषु, समभावापन्नेषु छात्रमित्रेषु परिगणनं विविच्य समधिकं सुखं संप्राप्तुं ते समर्थाः भवितुं शक्नुवन्ति।

संस्कृतविषयमाश्रित्य विविधासु पाठशालासु विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च अध्यापयन्तः सहस्रशः अध्यापकाः स्वस्वस्थानानुगुणं स्वाध्यापनसामर्थ्यं प्रदर्शयन्तोऽपि सम्पूर्णसंस्कृतजगतः कल्याणाय ते एव उपादानीभूता मार्गदर्शकाः सन्तीति यदा अनुभवेयुस्तदा स्वस्वस्थानगतसौविध्योपलब्ध्यादिगतां न्यूनतां ते बृहद्वृत्त्यपेक्षया अतीव सामान्यां नगण्यां वा विमर्ष्टुं शक्ष्यन्ति, किं च संस्कृतस्य सर्वाङ्गीणविकासाय आत्मनः भूमिकां विनिश्चेतुं प्रभविष्यन्ति। अत्रापि उपर्युक्तैव स्थितिः भवितुम् अर्हति, अर्थात् यथा यथा ऊर्ध्वं व्यापकं भावं च पश्यामः, तथा तथा आत्मनि संजायमाना दीनहीनभावना स्वयमेव दूरं गच्छति,

आत्मनि 'मयाऽपि किमपि कर्तुं शक्यते तथा च मयापि स्वजीवने किंचित् स्वसंकीर्णसीमानं विहाय बृहत्तरहिताय संस्कृतक्षेत्रे किंचित् करणीयम्' इत्येतादृशः आत्मविश्वासः समुत्पद्यते। यथा पर्वतस्याधः स्थित्वा केवलं पर्वतैकदेशं तद्गतन्यूनतां च द्रष्टुं शक्नुमः, किन्तु पर्वतशिखरम् आरोहामश्चेत् चतुर्षु दिक्षु विशालं व्यापकं च दृश्यं दृष्ट्वा प्रसीदामः, तथैव यदा यदा सत्यस्य व्यापकं विशालं च स्वरूपम् अनुध्यायामः परिशीलयामश्च तदा तदा तेन स्वरूपेण सह आत्मनः अन्वयं परमेश्वरस्य परमाशीः अनुकम्पेति वा विचारयामः, ततश्च तत्स्वरूपसंरक्षणाय तद्व्यापकवृत्तेः परिपोषणाय आत्मनः भूमिकां विनिश्चिनुमः। एषैव ऊर्ध्वगतिः, एषैव सात्त्विकवृत्तिरिति श्रीमद्भगवतो गीतावचनात् विमर्ष्टुं शक्यते, तद्यथोक्तमस्ति-

**ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।**
**जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः।।** इति।

अर्थात् केवलमात्मनः संकीर्णवृत्तेः पूरणाय यत्नः तामसः, किं च पर्वतस्य उपरिगमनमिव व्यापकदृष्ट्या विषयस्य पर्यालोचनमेव ऊर्ध्वगमनम्, तदेव सत्त्विकी वृत्तिरिति।

आगामिषु दश-विंशति-पञ्चाशत्सु वर्षेषु वर्तमानापेक्षया संस्कृतस्य दृश्यं कीदृशं स्यादिति कल्पना करणीया चेत् केवलम् आत्मनः वैयक्तिकीं स्थितिमाकलय्य तत् कर्तुं न शक्यते, यतो हि व्यैयक्तिकस्थितेः आयुरारोग्यावस्थित्यादिविषयकः सीमा वर्तते। अतः तादृशी कल्पना तु व्यापकरूपेण सर्वासां शिक्षणसंस्थानां परिवर्तमानां सामाजिकीं राजनीतिकीं वैश्विकीं च स्थितिं परिकल्प्य कर्तुं शक्यते। तादृश्यां कल्पनायां कृतायां तस्याः स्थितेः आनुकूल्याय मया इदानीं किं करणीयम्, कथं वा प्रवर्तनीयम् इत्यादि सात्त्विकप्रवृत्तयः जन्येरन्। तस्मिन्नवसरे गतशताब्द्यां यथा अनुवादपद्धत्या पठनपाठनशोधकार्यादिविधिभिः संस्कृतभाषा दूरङ्गता किं च दूरङ्गतायां तस्यां तन्निहितशास्त्रसंरक्षणादिविषये निष्ठापरो यत्नोऽपि क्षीणतां गतः इत्येतद् विमृश्य तस्याः भाषायाः केवलम् उद्योगप्राप्तये साधनरूपेण उपयोगमनभिज्ञाय तस्या व्यापकप्रयोगविधिमपि कल्पयितुम् अस्माभिः प्रवर्तनीयम्।

संस्कृतशोधपत्राणां विषयेऽपि वर्तमाना स्थितिः आगामिनी वृत्तिश्च आकलनीयैवास्ति। सरलतया प्रान्तीयहिन्द्यादिभाषासु प्रवृत्तिकारणेन संस्कृतेन लेखितुं ये समर्थास्तेऽपि संस्कृतेतराभिः तत्तत्प्रान्तीयभाषाभिः लेखान् लेखितुं प्रभवन्ति। तथापि आधुनिककाले संस्कृतेन नवीनकाव्य-नाटक-काव्यादीनां संरचना, इतराभ्यः भाषाभ्यः संस्कृतेनानुवादः, संस्कृतेन यात्राकथा-दैनन्दिन्यात्मकथासाक्षात्कारादिविषयाश्च समुद्गच्छन्तीति महानेष प्रमोदस्य विषयः। तदनुरूपं शोधपत्रलेखनं संस्कृतेन अतीव न्यूनमेव दृश्यमानमस्ति। तत्र तदेव उपर्युक्तं कारणं द्रष्टुं शक्यते, अर्थात् स्वस्य शोधपत्रं केवल स्वात्मसीमानुबद्धतया संक्षिप्तरूपमपि बृहत्परिमाणकस्य शोधकार्यस्य अंशभूतमेवेति यदि विमृशामस्तर्हि तल्लेखने उत्साहभङ्गो नैव स्यात्। कः पठति, कः पठिष्यति, कति वा पाठकाः सन्ति इत्यादीन् अभावात्मकान् प्रश्नान् स्वमनसि



उद्भाव्य तैः अग्रे ऊर्ध्वं वा गमनाय प्रवृत्त्यभावापेक्षया 'कालो ह्ययं निरविधिर्विपुला च पृथ्वी' इति बृहत्परिमितं व्यापकं वैश्विकं दृश्यं परिकल्पयामश्चेत् शोधपत्रलेखने शोधपत्रपठने तत्समीक्षायां च सम्यक् प्रवृत्तिः जागरिष्यति।

अवसरेऽस्मिन् वर्तमानकाले शास्त्रसंरक्षणविधौ संगणकस्य क्रियमाणाः आधुनिकाः प्रयोगाः तत्कृताः उपयोगा अपि सुतरां विवेच्याः। तेन संस्कृतशिक्षणसंरक्षणसंवर्धनोपायानां कृते आधुनिकविधीनां स्वीकरणेन महत् सारल्यं सम्भाव्यते। किन्तु तत्र अतीव सतर्कताऽवलम्बनीया, अन्यथा याथातथ्येन तत् क्रियते चेत् तदेव असम्यग्रूपं प्रमाणरूपेण जनेषु संप्रसरिष्यति। एषः प्रज्ञापराध एव भविष्यति।

आरण्यकस्यास्य यथासमयं प्रकाशनाय अग्रे यतमाना भविष्यामः, तदर्थं समेषां विदुषां सहभागं संप्रार्थ्य विरमति।

गोपबन्धु मिश्र
सम्पादकः
आरण्यकम्

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. **मीमांसायां सुबर्थविचारः** | प्रो. सोमनाथ नेने<br>संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | १ |
| २. **रूपकालङ्कारलक्षणपरिष्कारे पण्डितराजस्यावदानम्** | प्रो. शिवराम शर्मा<br>साहित्यविभागः,<br>संस्कृतविद्याधर्मविज्ञानसङ्कायः,<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी | ९ |
| ३. **अन्वीक्षावैशिष्ट्यम्** | डॉ.सिद्धिदात्री भारद्वाजः<br>असिस्टेंट प्रोफेसर<br>संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी | १७ |
| ४. **नैषधीयचरिते उपवनस्योद्दीपनत्वम्** | डॉ. बबुआ नारायण मिश्रः<br>आचार्यः<br>श्रीमातावैष्णोदेवीगुरुकुलम्,<br>चरणपादुका, कटरा (जम्मू-कश्मीरम्) | २५ |
| ५. **वैदिकवाङ्मये 'अक्षर'-शब्दस्य विविधा अर्थाः** | संगीता आर्या<br>शोधच्छात्राः, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | ३१ |
| ६. **विवाहकालविमर्शः** | डॉ. गणेशत्रिपाठी<br>मुक्तस्वाध्यायपीठम्<br>राष्ट्रियसंस्कृतसंस्थानम्, देहली | ४१ |
| ७. **अक्षराधिकरणविमर्शः** | आचार्य श्रीपाद सुब्रह्मण्यः<br>श्रीरामनगर कालोनी<br>पुप्पलगुडा, हैदराबाद-५०० ०८९ | ४५ |

# मीमांसायां सुबर्थविचारः

**प्रो. सोमनाथ नेने**

कर्मात्मकस्य धर्मस्यावबोधनार्थमनुष्ठानार्थं च प्रवृत्तिमुपपादयितुं प्रवर्तते द्वादशलक्षणात्मकमिदं मामांसाशास्त्रम्। यागानुष्ठानकर्मप्रवृत्तेर्यजेतेत्यादिवाक्यस्थप्रत्ययनिष्ठलिङ्त्वांशजन्यत्वाद्यद्यपि लिङर्थात्मिका प्रेरणाऽपरपर्याया शाब्दी भावना एव प्रधानरूपेण विवेचनीया वर्तते।

मीमांसायां सर्वेषां वाक्यानां भावनामुख्यविशेष्यकस्यैव शाब्दबोधः स्वीक्रियते। अस्मादेव कारणात् भाट्टचिन्तामणौ कारकत्वविचारप्रसङ्गे गागाभट्टेन '**सिद्धान्तस्त्वाख्यातार्थान्वितविभक्त्यर्थान्वयित्वं कारकत्वमिति**'[1] मीमांसाभिमतं कारकत्वं संसाध्य यजेतेत्यादिस्थलेष्वार्थभावनायामन्विते विभक्त्यर्थे यागकर्मणि समन्वितानां लिङ्गसंख्यादीनामपि कारकत्वं स्वाभिमतमिति '**लिङ्गसंख्यादीनां कारकत्वमिष्टम् एवे**'[2]त्यनया पङ्क्त्या प्रतिपाद्यते।

एवमेव, वाक्यस्थैः सर्वैरप्याख्यातप्रत्ययैः आर्थभावनाया एव जन्यत्वादियमार्थी भावनापि मीमांसायां शाब्दभावनावदेव विचारणीया वर्तते तथापि, **व्रीहीनवहन्ति,**[3] **व्रीहीभिर्यजेत,**[4] **मैत्रावरुणाय दण्डः प्रयच्छति,**[5] **अग्नेः तृणान्यपचिनोति,**[6] **यजमानस्य याज्या,**[7] **यदाहवनीये जुहोतीत्यदिषु**[8] वाक्येषु सर्वासां विभक्तीनां प्रयोगादयं विभक्त्यर्थोऽपि मीमांसायामनुषङ्गत्वेन विचारितो वर्तते। एतेषु विभक्त्यर्थात्मकेषु सुबर्थेषु मीमांसाशास्त्रकूले षष्ठीवर्जं सर्वासां विभक्तीनां कारकत्वं स्वीक्रियते। तत्रोच्यते–

**कर्म कर्ता च करणं सम्प्रदानं तथैव च।**
**अपादनाधिकरणमित्याहुः कारकाणि षट्॥**[9]

भाट्टचिन्तामणौ ''**प्रथमाषष्ठीवर्जं सर्वविभक्तयः कारकाणी**''[10]त्यनया पङ्क्त्या षष्ठीवत्प्रथमाविभक्तेरपि कारकत्वं न स्वीक्रियते।



शाब्दबोधे शाब्दभावनायाः मुख्यविशेष्यकत्वेन स्वीकारान्मीमांसायां शाब्दभावनायां साध्यत्वेन समन्वितायामार्थभावनायां यागात्मकस्य कर्मणो माध्यमेन समन्वयादेव सुबर्थस्य प्रयोजनवत्त्वमवैमि।

यागानुष्ठानप्रवृत्तिप्रतिपादकत्वान्मीमांसायां यागस्य भावनायां साधनत्वेन सह साध्यत्वेनापि प्रामुख्येन समन्वयादेतयोः साधनत्वसाध्यत्वयोरेव प्राधान्येनोपलभ्यन्ते प्रयोगवाक्यानि। एतयोरपि यागानुष्ठानोपकारके अङ्गाङ्गिभावबोधे तृतीयार्थस्य करणत्वस्य प्राबल्यात्तृतीयाविभक्त्यर्थस्य सुबर्थस्यैव सर्वोपरि प्राधान्यं मीमांसायामभिमतं प्रतीयते।

## प्रथमाविभक्त्यर्थस्य निरूपणम्

यद्यपि प्रथमाविभक्तेः कारकत्वमभिमतन्नास्ति तथापि सुबर्थत्वाद्भाट्टचिन्तामणौ 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति पाणिनिस्मृत्यनुरोधात् (1) पुमान् देवदत्तः, (2) द्रोणो व्रीहिः, (3) एको घटः इत्येषां त्रयाणामुदाहरणानां क्रमशः (1) पुंस्त्वाभिन्नलिङ्गवान् देवदत्तः, (2) द्रोणाभिन्नपरिमाणवान् व्रीहिः एकत्वसंख्यावान् घटश्चेति शाब्दबोधाः प्रदर्शितास्सन्ति।[11] एवमेव '**यजेत स्वर्गकामः**'[12] 'इत्यत्रापि एकत्वसंख्यासमन्वितयजमानकर्तृका स्वर्गनिष्ठकर्मतानिरूपिका (स्वर्गसाधिका) यजमाननिष्ठप्रवृत्त्युत्पादिका प्रवर्तनापरपर्याया शाब्दी भावनेति संगच्छते शाब्दबोधः।

## षष्ठीविभक्त्यर्थस्य निरूपणम्

एवमेव कारकत्वाभावेऽपि सुबर्थत्वात् षष्ठ्या अपि सामान्यातिरिक्तेषु सम्बन्धेषु शक्तेरभावात् सम्बन्धसामान्ये एव मीमांसायां शक्तिः स्वीक्रियते। स्वत्वस्वामित्वविषयत्वसाध्यत्वजनकत्वादयः विशेषसम्बन्धा एभिर्लक्षणया एव मानसा वा स्वीक्रियन्ते। अत एव, यजमानस्य याज्या इत्यत्र, वेदवाक्ये सम्बन्धमात्रप्रकारकत्व एव बोधः स्वीक्रियते- **'एवं षष्ठ्यपि 'षष्ठी शेषे**[13] **इति सूत्रेण विहिता न कारकविभक्तिः। शेषे उक्तकर्मत्वाद् द्वितीयाद्यर्थभिन्ने सम्बन्धमात्रे षष्ठीति सूत्रार्थः। एवं च सम्बन्धे षष्ठ्याः शक्तिः। सम्बन्धत्वं शक्यतावच्छेदकं चैत्रस्य धनमित्यादौ** (इत्यादिपदेन यजमानस्य याज्या इति वैदिकमपि वाक्यं स्वीकरणीयमिति स्पष्टम्) **सम्बन्धप्रकारक एव बोधः। स्वत्वस्वामित्वविषयत्वसाध्यत्वजनकत्वादिविशेषे तु लक्षणा। एवं सर्पिषो जानीते, मातुः स्मरतीत्यादौ सम्बन्धप्रकारकत्व एव बोधः। तात्पर्यग्रहाच्च विशेषबोधो लक्षणया मानसो वेति जीर्णाः।**[14]

प्रातिपदिकस्यार्थवत्त्वाद् विभक्तिकार्यात्प्राक् व्यक्तिविशेषावबोधस्यासम्भवात्प्रातिपदिकत्वसिद्धये भर्तृहरिणा।

**तत्रार्थवत्त्वात्प्रथमा संज्ञाशब्दाद्विधीयते।**
**अस्येति व्यतिरेकश्च तदर्थादेव जायते॥**[15]

इत्यनया कारिकया सामान्यरूपमर्थं संसाध्य प्रातिपदिकसंज्ञाविधानपुरस्सरं विभक्तिकार्यं संसाध्यते। 'यजेत स्वर्गकाम' इत्यादिषु वैदिकस्थलेषु वेदस्यानादिव्यवहारसिद्धत्वात् अपौरुषेयत्वात् स्वतः प्रामाण्याच्चात्र विशेषावबोधस्य सर्वदैवोपस्थितौ सामान्यरूपोऽर्थो नापेक्ष्यते मीमांसायामिति मन्ये।

## द्वितीयाविभक्त्यर्थस्य निरूपणम्

व्याकरणशास्त्रानुरूपं मीमांसायायामपि कर्मत्वमेव द्वितीयार्थं प्रतिपाद्य क्रियाजन्यफलशालित्वमिति स्वाभिमतं कर्मत्वलक्षणं प्रदर्श्यते गागाभट्टभाट्टचिन्तामणौ। घटं पश्येतीत्यत्र दर्शनक्रियाजन्यं ज्ञाततात्मकस्य फलस्य घटनिष्ठत्वात् लक्षणसमन्वयोऽप्यत्र प्रदर्शितो वर्तते– **तत्र द्वितीयायाः कर्मत्वमर्थः। तच्च क्रियाजन्यफलशालित्वम्। घटं पश्यतीत्यत्र दर्शनजन्यज्ञानतया घटनिष्ठत्वाल्लक्षणसमन्वयः।**[16]

## कर्मभेदनिरूपणम्

व्याकरणस्मृतिमङ्गीकृत्य कर्मण ईप्सितानीप्सितभेदेन विद्यमानयोरुभयोरपि कर्मणोः भेदानां वैशद्यं भाट्टचिन्तामणौ मीमांसाशिरोमणिभिर्गागाभट्टैः प्रकाशितम्।

उभयोरेतयोरीप्सितानीप्सितकर्मणोः ईप्सितकर्मण उत्पाद्यप्राप्यविकार्यसंस्कार्यात्मकाः चत्वारो भेदाः निरूपिताः। एतेषु प्रथमस्येप्सितस्योत्पाद्यस्य कर्मणः दृष्टान्तरूपेण **'घटं कुरुते'** इति लौकिकमुदाहरणं भाट्टचिन्तामणौ प्रदर्शितं वर्तते। अत्र घटशब्देन प्रतिपादितस्य कम्बुग्रीवाद्याकारेण विद्यमानस्य घटरूपस्य कर्मकारकस्य घटनिर्मितेः प्रागनवस्थानादस्याविद्यमानस्य घटकर्मणः क्रियाद्वारा उत्पत्तेर्जायमानत्वान्निष्पद्यते घटात्मकस्य कर्मण उत्पाद्यमीप्सिततमं कर्मत्वम्।

लौकिकमुदाहरणसङ्गतिं प्रदर्श्य **'यूपं छिनत्ति'** इति वैदिकमप्युदाहरणं गागाभट्टमहाभागैः प्रदर्शितं भाट्टचिन्तामणौ **'तत्राद्यं चतुर्धा उत्पाद्यप्राप्यविकार्यसंस्कार्यभेदात्। उत्पत्तिर्नाम येनाकारेण कारकमभिधानोपात्तं तस्यासत एवोत्पादनम्। यथा 'यूपं छिनत्ति', घटं कुरुते।'**[17]

**'यूपं छिनत्ति'** इत्यत्र यज्ञार्थे पशुबन्धने प्रयुक्तस्य वस्तुविशेष्याकारेण यूपशब्दद्वारा प्रतिपादितस्य यूपवस्तुनः छेदनक्रियायाः प्रागनवस्थानाच्छेदनक्रियानन्तरमेवास्य यूपस्य जायमानत्वादत्र निष्पद्यते क्रियाजन्यत्वात्मकमुत्पाद्यमीप्सिततमं कर्माङ्गभूतं कर्मत्वम्।



एवमेव, समुल्लिखितेषु चतुर्विधेषु भेदेषु ईप्सिततमस्य संस्कार्यकर्मणोः वैदिकोदाहरणत्वेन **'व्रीहीनवहन्ति'** इति वाक्यं गागाभट्टैः यथाशास्त्रं प्रदर्शितं वर्तते। अत्र प्राप्तेषु व्रीहीषु अवहननेन तण्डुलनिष्पत्त्यात्मकस्य दृष्टातिशयस्योत्पत्तेः अवहननक्रियायाः विकार्येप्सिततमकर्मत्वं व्रीहेः संगच्छते 'तद्गतदृष्टातिशयोत्पादनं विकृतिः। यथा-व्रीहीनवहन्ति।[18]

एवमेव, **व्रीहीन्प्रोक्षतीत्यत्र** व्रीहीषु प्रोक्षणेनादृष्टस्योत्पत्तेः व्रीहीनित्यत्र ईप्सिततमकर्मणः संस्कार्यरूपो भेदोऽप्यत्र संगच्छते **'तस्यैवादृष्टातिशयोत्पादनं संस्कार इति। यथा व्रीहीन् प्रोक्षति।'**[19]

शाब्दबोधे शाब्दीभावनायाः मुख्यविशेष्यकत्वेन स्वीकारान्मीमांसायां शाब्दभावनायां साध्यत्वेन समन्वितायामार्थभावनायां यागात्मकस्य कर्मणो माध्यमेन समन्वयादेव द्वितया–सुबर्थस्य मीमांसायां वर्तते प्रयोजनवत्त्वम्।

## तृतीया–विभक्त्यर्थस्य निरूपणम्

पशुना यजेतेत्यत्र शाखान्तरेऽस्य पाठस्यास्तित्वमङ्गीकुर्वद्भ्यां खण्डदेवपार्थसारथिमिश्रमहाभागाभ्यां वाक्यान्तरेण प्राप्तस्य यागस्योद्देश्येन पुंस्त्वसंख्यात्वोभयाभ्यां विशिष्टस्य तृतीयाकारकार्थस्य करणत्वस्य विधानं स्वीक्रियते। अत एव **पुंस्त्वसंख्यात्वविशिष्टेन पशुकरणत्वेन यागं भावयेदित्यस्मिं**च्छाब्दबोधे करणत्वस्य कारकस्य भावनान्वयित्वेन मन्ये निष्पद्यते प्रयोजनवत्त्वम्। एवमपरमपि वैदिकोहरणप्रदर्शनेच्छया दर्शपूर्णमासवाक्यमप्यत्र गागाभट्टैः विवेवितम्। **'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'** इत्यस्मिन् वाक्ये स्वर्गात्मकस्य फलस्योद्देश्येन प्रवृत्तस्य यजमानस्य प्रयाजाद्यङ्गकर्मव्यापारैः स्वर्गोत्पत्तौ दर्शपूर्णमासस्य यागस्य सम्पाद्यते अपूर्वोत्पादकोपकारः, अस्मादेव कारणाद्दर्शपूर्णमासयागस्य प्रयाजाद्यङ्गसम्पादनात्मकस्य कर्तुर्व्यापारस्योपकार्यत्वान्निष्पद्यते दर्शयागे स्वर्गफलनिरूपितं करणत्वम्।

## चतुर्थ्यादीनां विभक्त्यर्थानां निरूपणम्

चतुर्थीविभक्त्यर्थस्योदाहरणत्वेन मीमांसान्यायप्रकाशस्य न्यायबोधिनीव्याख्यायां 'मैत्रावरुणाय दण्डं प्रयच्छती'ति[20] वाक्यमुपलभ्यते। अत्र चतुर्थ्यर्थेन मैत्रनिष्ठसम्प्रदानत्वं मैत्रावरुणोद्देश्येन दण्डदानस्याङ्गत्वं बोधयताऽभिव्यज्यते। 'यदग्नये च प्रजापतये च सायं जुहोती'त्यत्र अग्नये इत्यनेन सह प्रजापतये इत्यपि चतुर्थ्यात्मकं सुबन्तं पदं विद्यते। भट्टसोमेश्वरेण सह पार्थसारथिमिश्रमतेऽपि 'प्रजापतये' इत्यत्र सम्प्रदानत्वेन सह देवतात्वस्यापि

सुबर्थत्वं स्वीक्रियते। यद्यप्यत्र सम्प्रदानत्वस्यैव सुबर्थत्वमभिमतन्तथापि सम्प्रदानत्वेन सह देवतात्वस्यापि सुबर्थत्वमापदेवमहाभागैः **'यद्यपि देवतात्वे चतुर्थीस्मरणं नास्ति, 'सम्प्रदाने चतुर्थी'** (चतुर्थी सम्प्रदाने, पाणिनिसूत्रम्, 2।3।13) **इति सम्प्रदाने तस्याः स्मरणात्, तथापि त्यज्यमानद्रव्योद्देश्यत्वं तावद्देवतात्वम्। तच्च सम्प्रदानस्वरूपान्तर्गतम्, त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्वस्य सम्प्रदानत्वात्। अतश्चतुर्थीतः सम्प्रदानैकदेशतया देवतात्वप्रतीतिरस्त्येव।'**[21] आभिः पङ्क्तिभिः साधितमिति।

प्राचीनैर्मीमांसकैः सम्प्रदानवद्देवतात्वेऽपि चतुर्थ्याः शक्तिमङ्गीकृत्य सम्प्रदानवद्देवतात्वस्यापि सुबर्थत्वं स्वीक्रियते। **'अग्नये स्वाहा'**[22] इत्यत्र स्वाहाशब्दार्थस्य हविस्त्यागस्य अग्नेर्विशेषणत्वेन प्रतीतेर्जायमानत्वादत्राग्नौ स्वाहापदनिरूपितं यद्विशेषणत्वं, तस्य सम्बन्धान्तराभावाद्देवतात्वरूपेण स्वरूपसम्बन्धेनैव चतुर्थ्याः देवतात्वे प्राचीनैः शक्तिः स्वक्रियते–**'एवमग्नये स्वाहा' इत्यादावपि स्वाहाशब्दार्थहविस्त्यागे अग्नेश्च विशेषणत्वेन प्रतीतेः। सम्बन्धान्तरत्वाभावेन देवतात्वेनैव विशेषणतेति तत्र चतुर्थ्याः शक्तिः। इति जीर्णाः।**[23]

एवमेव, तद्धितमन्त्रवर्णयोरपि देवतात्वे एभिः शक्तिः स्वीक्रियते। यद्यप्यत्र देवतात्वप्रतिपादने, तद्धितचतुर्थीमन्त्रवर्णानां त्रयाणामपि शक्त्याऽवबोधकत्वं समानं, तथाप्येतेषां पारदौर्बल्यमेभिः स्वीक्रियते। तद्धितापेक्षया यथा चतुर्थ्याः दौर्बल्यं तथैव, चतुर्थ्यपेक्षया मन्त्रवर्णानां दौर्बल्यमस्तीति वर्तते पारदौर्बल्यस्याशयः। यथाहुः वार्तिककाराः–

**तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।**
**देवताया विधिस्तत्र दुर्बलं तु परम्परम्॥**[24]

अनेन वार्तिकेन तद्धितेन सह चतुर्थीमन्त्रवर्णयोरपि शक्त्या देवतात्वस्य प्रतिपादनं प्रचीनैर्मीमांसकैः साध्यते।

प्रानीनाचार्याणामभिमतां देवतायां चतुर्थ्याः शक्तिं निराकुर्वद्भिः श्रीदिनकरभट्टमहाभागैरुच्यते यदत्र देवताशब्दातिरिक्तैः तद्धितचतुर्थीमन्त्रवर्णैर्यद्देवतायाः प्रतिपादनं जायते तच्छक्त्या न जायतेऽपितु शक्तेरभावाल्लक्षणया एव स्वीक्रियते। अयमेवार्थः 'दुर्बलं तु परम्परम्' इत्यस्य वार्तिकांशस्य परामर्शेन निष्पद्यते। शक्तिविरहे एवैतेषु पूर्वापेक्षया परस्य दौर्बल्यं प्रतिपाद्यते। एतेषु विद्यमानयानयाऽसमानतया ज्ञायते यदेतेषु यद्यपि देवताबोधकत्वं वर्तते तथाप्येतदवबोधकत्वं लक्षणया एव वर्तते, शक्त्याऽवबोधकत्वं तु नास्त्येव। अत एव, प्राचीनानां मते चतुर्थ्यां देवताऽवबोधनिरूपिता शक्तिर्न स्वीक्रियते–**'अत्र पितृचरणाः– नेदं वार्तिकं चतुर्थ्या देवतात्वे शक्तिबोधकं, किन्तु देवताप्रतिपादकान्तरोपलक्षणं सच्चतुर्थीमन्त्रवर्णादौ देवतालाक्षणिकत्वपरं, दुर्बलं तु परं परमित्यभिधानात्।**[25]



एवमेव मीमांसान्यायप्रकाशव्याख्यायां न्यायबोधिन्यां पञ्चम्यर्थस्यापादानस्य उदाहरणत्वेन **अग्नेस्तृणानि अपचिनोतीति** वाक्यमुदाहृयते। अत्राग्निनिष्ठापादानेन सुबर्थेन तृणापचयस्याग्निं प्रत्यङ्गत्वं प्रतिपाद्यते। एवमेव, पञ्चमीकारकविभक्त्यात्मकस्य सुबर्थस्य **'मध्यात्पूर्वार्द्धादवद्यति'** इत्यपि याज्ञिकमुदाहरणं विश्वेश्वरभट्टैः विवेचितम्। अत्र हविषः मध्यभागेन सह पूर्वार्द्धभागादवदानस्य वर्तते विधानम्। अत्र विभागप्रयोजकक्रियानाश्रयस्य तन्निरूपकस्याधोभागस्यापादानत्वं निष्पद्यते–**मध्यादवद्यतीत्यादौ विभागप्रयोजकक्रियानाश्रयस्य तन्निरूपकस्याधोभागस्य अपादानत्वम्।**[26]

यद्यपि सम्बन्धमात्रात्मकः षष्ठ्यर्थः कारकत्वेनाभिहितो नास्ति मीमांसायां तथापि सुबर्थत्वाद्यागभावनायामङ्गत्वेनाभिमतत्वाच्चास्योदाहरणत्वेन 'यजमानस्य याज्येति' वाक्यं व्याख्यायां प्रदर्श्य यजमानं प्रति षष्ठ्यर्थेन सम्बन्धमात्रेण याज्याया अङ्गत्वं पट्टाभिरामशाशास्त्रिचरणैः प्रदर्श्यते।[27]

अधिकरणत्वार्थस्य पञ्चम्यर्थस्योदाहरणत्वेन यदाहवनीये जुहोतीति वाक्यं मीमांसान्यायप्रकाशस्य मूले उद्धृतमस्ति–**'यदाहवनीये जुहोती'त्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या।**[28] अत्र सप्तम्यर्थेनाधिकरणत्वेनाहवनीयस्य होमाङ्गत्वं स्वयम् आपदेवेनैव प्रकाशितं वर्तते।

### उपपदविभक्तेः दौर्बल्यम् कारकविभक्तेश्च बलीयस्त्वम्

**'यजेत स्वर्गकाम'** इत्यादीनां वेदवाक्यानामर्थविचारस्य प्रधानविषयत्वान्मीमांसायां यागादिक्रियानुकूलायाः प्रवृत्तेरुत्पादिकायाः प्रवर्तनाऽपरपर्यायाः शाब्दभावनाया एव प्राधान्यादस्यां शाब्दभावनायां साध्यत्वेन समन्वितायाः प्रवृत्तेः यागादिक्रिया जनकत्वाच्च क्रियानुकूलप्रवृत्तिजनकत्वस्यैव परमप्रयोजनत्वात्क्रियायाः मीमांसायां सर्वोपरि विद्यमानं महत्त्वं सुतरां प्राधान्येन विजृम्भते।

यद्यपि सुबर्थे कारकविभक्तिवदुपपदविभक्तेरपि वर्तते समानमस्तित्वन्तथाऽपि क्रियान्वयित्वस्य साक्षाद्रूपेण कारकविभक्तिष्वेव समन्वयादुपपदविभक्तेः यस्यां क्रियायां संगच्छते समन्वयः तस्य कल्पितरूपत्वादुभयोर्मध्ये कारकविभक्तेरेव बलीयस्त्वं स्वीकुर्वन्ति मीमांसकाः।

यथाहुः श्रीविश्वनाथभट्टापरपर्यायाः गागाभट्टमहाभागाः–**अत्र चोपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वम्। कारकविभक्त्यर्थस्य श्रुतक्रियान्वयित्वात्। उपपदविभक्त्यर्थस्य कल्पितक्रियान्वयित्वादिति दिक्।**[२९]

उपपदविभक्तेः कारकविभक्तेर्बलीयस्वादेव **मुनित्रयं नमस्कृत्येत्यत्र** नम उपपदस्य योगेऽपि नमस्कारक्रियायां साक्षाद्रूपेणान्वयस्य निष्पन्नत्वान्नम इत्युपपदयोगेऽपि चतुर्थी न जायतेऽपितु कारकविभक्तेः प्राबल्यादेव **मुनित्रयं नमस्कृत्य** इति कर्मकारकमत्र संगच्छते। इत्थमेवोच्यते ज्ञानेन्द्रसरस्वतीमहाभागैरपि तत्त्वबोधिन्यां–**ननु स्वयम्भुवे नमस्कृत्य' इत्यत्रेवात्रापि नमःस्वस्ति–इत्यादिना चतुर्थी स्यात्। मैवम्। 'उपपदविभक्तेः कारकविक्तिर्बलीयसी' इति वक्ष्यमाणत्वात् 'नमस्करोति देवान्' इतिवद्द्वितीयाया एव युक्तत्वादिति दिक्।**[३०]

**परामर्शः**

यागानुष्ठानप्रवृत्तिप्रतिपादकत्वान्मीमांसायां यागस्य भावनायां साधनत्वेन सह साध्यत्वेनापि प्रामुख्येन समन्वयादेतयोः साधनत्वसाध्यत्वयोरेव प्राधान्येनोपलभ्यन्ते प्रयोगवाक्यानि। एतयोरपि यागानुष्ठानोपकारके अङ्गाङ्गिभावबोधे तृतीयार्थस्य करणत्वस्य प्राबल्यात् तृतीयाविभक्त्यर्थस्य करणत्वात्मकस्य सुबर्थस्येव सर्वोपरि प्राधान्यं मीमांसायामभिमतं प्रतीयते।

***

## सन्दर्भाः


1. सिद्धान्तस्त्वा. भाट्टचिन्तामणिः, पृ.96
2. लिङ्गसंख्यादीनां, भाट्टचिन्तामणिः, पृ.96
3. व्रीहीनवहन्ति, आपस्तम्बश्रौतसूत्रम्, 1/9/11
4. व्रीहीनवहन्ति, आपस्तम्बश्रौतसूत्रम्, 1/9/11
5. मैत्रावरुणाय दण्डं प्रयच्छति, तैत्तिरीयसंहिता, 6/1/4/2
6. अग्नेः तृणान्यपचिनोति, आपस्तम्बश्रौतसूत्रम्, 6/2/3/1
7. यजमानस्य याज्या, मीमांसान्यायबोधिनी





8. यदावहवनीये जुह्वति, तैत्तिरीयब्राह्मणम्, 1/1/10/5
9. कर्म-कर्ता च करणं, मीमांसाकुतूहलम्।
10. प्रथमाषष्ठीवर्जम्, भाट्टचिन्तामणिः।
11. प्रथमाषष्ठीवर्जम्, भाट्टचिन्तामणिः।
12. यजेत स्वर्गकामः, मीमांसान्यायबोधिनी।
13. षष्ठी शेषे, पाणिनिसूत्रम्, 2/3/50
14. एवं षष्ठ्यपि, भाट्टचिन्तामणिः, पृ.93
15. तत्रार्थवत्त्वात्प्रथमा, वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिकासंख्या 67
16. तत्र द्वितीयायाः, भाट्टचिन्तामणिः।
17. तत्राद्यं चतुर्धा, भाट्टचिन्तामणिः, पृ.96
18. तद्गतदृष्टातिशयोत्पादनम्, भाट्टचिन्तामणिः।
19. तस्यैवादृष्टातिशयोत्पादनम्, भाट्टचिन्तामणिः।
20. मैत्रावरुणाय, मीमांसान्यायबोधिनी।
21. यद्यपि देवतात्वे, मीमांसान्यायबोधिनी।
22. अग्नये स्वाहा, तैत्तिरीयं ब्राह्मणम्।
23. एवमग्नये स्वाहा इत्यादावपि, भाट्टचिन्तामणिः।
24. तद्धितेन चतुर्थ्या, तन्त्रवार्तिकम्, 2/2/9
25. अत्र पितृचरणाः, भाट्टचिन्तामणिः।
26. मध्यादवद्यतीत्यादौ, भाट्टचिन्तामणिः।
27. मीमांसान्यायप्रकाशपट्टाभिरामशास्त्रिकृता हिन्दी व्याख्या, पृ.72
28. यदाहवनीये जुहोति, मीमांसान्यायबोधिनी, पृ.145
29. अत्र चोपपदविभक्तितः, भाट्टचिन्तामणि।
30. सिद्धान्तकौमुदी-तत्त्वबोधिनी व्याख्या।


***

# रूपकालङ्कारलक्षणपरिष्कारे पण्डितराजस्यावदानम्

**प्रो. शिवराम शर्मा**

काव्यशास्त्रे काव्यलक्षणनिर्धारणपराणामाचार्याणामनेकानि मतमतान्तराण्युपलभ्यन्ते। तत्र शब्दार्थयोः शब्दस्य अर्थस्य वा काव्यतामुपपादयद्भिराचार्यैः यत् तत्त्वं काव्यताधान-हेतुतयावधारितं तदस्त्यलङ्कारतत्त्वम्, अत एव शास्त्रस्यास्य अलङ्कारशास्त्रमित्यभिधानमपि प्रथितमस्ति। शब्दार्थावाश्रित्यात्मस्वरूपमासाद्यमानानाम् अलङ्काराणां लक्षणव्याख्यानपरम्परा आभरतादापण्डितराजं निरन्तरमुपचीयमानोपलभ्यते। अत्रालङ्काराणां संख्यासमृद्ध्या सह तेषां लक्षणानां परिष्कारोऽप्यविरतं बभूव, फलतो भरतेन सामान्यतया लक्षिताश्चत्वारोऽ-लङ्काराः सार्धशताधिकसंख्यावत्तामुपाययुः। कालक्रमेण लक्षणान्यप्येतेषामुत्तरोत्तरं परिष्कारं भजमानानि पण्डितराजेन स्थिरतामानिन्यिरे। संस्कृतवाङ्मयस्य निधिभूतेऽस्मिन् अलङ्कारलक्षणोपक्रमे येषामलङ्काराणां लक्षणान्याश्रित्य गहनं चिन्तनं बभूव तेषु रूपकालङ्कारः सर्वातिशायिमहत्त्वमादधाति। अत्र रूपकस्य लक्षणमाश्रित्य आचार्याणां विचारक्रमः तत्र पण्डितराजकृतः परिष्कारश्च संक्षेपतो विचार्यते।

तत्र आद्याचार्येण भरतेन रूपकव्याख्यानमुपक्रामतोक्तम्–

**नानाद्रव्यानुषङ्गाद्यैर्यदौपम्यं गुणाश्रयम्।**<br>
**रूपनिर्वर्णनायुक्तं तद्रूपकमिति स्मृतम्॥**<br>
**स्वविकल्पैर्विरचितं तुल्यावयवलक्षणम्।**<br>
**किञ्चित् सादृश्यसम्पन्नं यद्रूपं रूपकं तु तत्॥**[1]

कारिकाद्वयात्मकमिदं लक्षणं पूर्वं रूपनिर्वर्णनायुक्तमौपम्यं रूपकतयावधारयति पश्चात् तुल्यावयवलक्षणं किञ्चित् सादृश्यसम्पन्नं यद्रूपं तद्रूपकमित्यवधार्य विशिष्टसादृश्यसम्पन्नस्य रूपस्य रूपकतामवगमयति। लक्षणमिदं यद्यपि नातिस्पष्टतया रूपकस्वरूपं स्फोरयति किन्तु मुनिनास्योदाहरणतया यत्पद्यं समुपस्थापितं तद्रूपकस्य स्वरूपज्ञानं कारयत्येव।



यथा–

**पद्माननास्ताः कुमुदप्रहासा विकासिनीलोत्पलचारुनेत्राः।**<br>
**वापीस्त्रियो हंसकुलैर्नदद्भिर्विरेजुरन्योन्यमिवाह्वयन्त्यः॥**[2]

अत्र साङ्गपरम्परितरूपकमङ्गं सदङ्गीभूतामुपमामुपपादयति। तद्यथा– वापीषु स्त्रीणामारोपोऽङ्गीभूतः, पद्मेषु आननानाम्, कुमुदेषु प्रहासस्य नीलोत्पलेषु च नेत्राणामारोपः परम्परितोऽङ्गभूतश्च वापीषु स्त्रीणामारोपस्य साधकोऽस्ति। स च ''हंसकुलैः नदन्त्यो वाप्यः अन्योन्यमाह्वयन्त्यः स्त्रिय इव विरेजुः'' इत्युक्त्या पर्यन्ते प्रतीयमानाया उपमायाः साधकमिति नाम रूपकसद्भावे सन्देहः किन्तु पूर्वोक्तलक्षणसंघटनमत्र केन प्रकारेण सम्भवतीति स्पष्टतया व्याख्यातुं दुष्करमेव। अतएव भरतोक्तस्यास्य लक्षणस्यास्यास्पष्टत्वात् परवर्तिभिराचार्यैः रूपकलक्षणपरिष्कारः कृतः। क्रमशश्च लक्षणमिदं स्पष्टतां निर्दुष्टताञ्चानयत्।

तत्र सर्वप्रथमं भामहाचार्येण रूपकलक्षणे स्पष्टता व्यधायि। तेनोक्तम्–

**उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते।**<br>
**गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः॥**[3]

अत्र ''गुणानां समतां दृष्ट्वा यत् उपमानेन उपमेयस्य तत्त्वं रूप्यते तद् रूपकम् विदुः'' इत्येवंरूपं लक्षणं प्रायः पूर्णतया रूपकं लक्षयति (सादृश्यमूलकस्यारोपस्य रूपकतां निश्चेतुमत्र कृतः 'गुणानां समतां दृष्ट्वा' इत्ययं निर्देशः परवर्तिभिः सर्वैराचार्यैः आधारतयाङ्गीकृतो लक्ष्यते। भामहस्य उदाहरणं पूर्णतया रूपकमुपपादयति। यथा–

**शीकराम्भोमदसृजस्तुङ्गा जलददन्तिनः।**<br>
**निर्यान्तो मदयन्तीमे शक्रकार्मुकवारणाः॥**[4]

अत्र शीकराम्भसि मदस्य शक्रकार्मुके वारणस्य जलदेषु दन्तिनामारोपात् निष्पन्नमिदं रूपकं सर्वथा निःर्दुष्टमस्ति, यतो ह्यत्र दन्तिरूपेणोपमानेन जलदरूपस्योपमेयस्य रूपणमर्थात् आहार्याभेदनिश्चयः स्वरूपसमतया कृष्णगुणसमतया च कृतोऽस्ति।

भामहानन्तरं दण्डी ''उपमैव तिरोभूतभेदा रूपकमुच्यते'' (का.द.2/16) इति लक्षणं विधाय रूपकस्यौपम्यमूलकतां स्वीचकार किन्तु लक्षणमिदं प्रकारान्तरेण भामहलक्षणमेवानुवदति। उपमानेन उपमेयस्य यत्तत्त्वरूपणं तदेवोपमायास्तिरोभूतत्वं नान्यत्। 'मुखं चन्द्रः' इत्यादिरूपकस्थले आह्लादकत्वादिगुणानामत्यन्तसाम्यात् तदाश्रययोः गुणिनोः मुखचन्द्रयोः आहार्याभेदनिश्चयो यः क्रियते तदेव भामहोक्तौ 'गुणानां समतां दृष्ट्वा उपमानेनोपमेयस्य रूपणम्' दण्डिमते च 'उपमायास्तिरोभूतभेदत्वम्' अङ्गीकर्तुं शक्यते।

आचार्योद्भटेन परम्परामनुसरतापि रूपके गौणीलक्षणायाः समावेशः कृतः। यथा–

**श्रुत्या सम्बन्धविरहाद् यत्पदेन पदान्तरम्।**
**गुणवृत्तिप्रधानेन युज्यते रूपकं तु तत्॥**[5]

अर्थात् श्रुत्या सम्बन्धविरहात् गुणवृत्तिप्रधानेन पदेन यत् पदान्तरं युज्यते तत्तु रूपकम्। अस्येदं तात्पर्यम् – श्रुत्या श्रवणमात्रेण अर्थात् अभिधया सम्बन्धविरहात् अन्वयाभावात् मुख्यार्थबाधादिति भावः गुणवृत्तिप्रधानेन–प्रधानतया गुणवृत्त्या अर्थात् गौणीलक्षणया अर्थप्रतिपादकेन पदेन यत् पदान्तरं युज्यते– आहार्याभेदनिश्चयतानीयते तत् रूपकम्। अत्रोद्भटेन सर्वप्रथमं रूपके श्रुत्या सम्बन्धविरहस्य अर्थात् मुख्यार्थबाधस्य गुणवृत्तेः प्राधान्यस्य च निवेशं कृत्वा सर्वथा स्पष्टतानायि रूपकलक्षणे।

आचार्यवामनेन **''उपमानेनोपमेयस्य गुणसाम्यात् तत्त्वारोपो रूपकम् उपमानेनोपमेयस्य गुणसाम्यात् तत्त्वस्याभेदस्यारोपणमारोपो रूपकम्।''**[6]

इत्यस्मिन् रूपकलक्षणे भामहोक्तं लक्षणमेव प्रकारान्तरेणोक्तम्। आचार्यो रुद्रटस्तु–

**यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिधा।**
**अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम्॥**[7]

इति रूपकलक्षणमुक्त्वा न किमपि विशेषमाह ऋते अविवक्षितसामान्यत्वम्। तच्चोत्प्रेक्षायामतिव्याप्तिवारणाय। यथोक्तं तट्टीकाकारेण नामिसाधुना– ''सदप्यत्र सामान्यं च विवक्ष्यते– सिंहो देवदत्त इति, उत्प्रेक्षायां तु छद्मलक्ष्मव्याजव्यपदेशादिभिः शब्दैरुपमानोपमेययोरभेदो भेदश्च विवक्षित इति। परमार्थतस्तूभयत्राभेद एवेति।''[8]

कुन्तकः–

**उपचारैकसर्वस्वं यत्तत् साम्यमुद्वहत्।**
**उपदर्पयति रूपं स्वं वस्तु तद्रूपकं विदुः॥**[9]

इत्युक्त्वा उद्भटोक्तगुणवृत्तिपदस्थले उपचारपदं प्रयुज्य रूपके गौणीलक्षणां समर्थयामास। भोजराजोऽपि पूर्वाचार्यलक्षणानि समर्थयामास। यथा–

**यत्रोपमानशब्दानां गौणवृत्तिव्यपाश्रयात्।**
**उपमेये भवेद्वृत्तिस्तदा तद्रूपकं विदुः॥**[10]

इत्थमाभरतादाभोजराजं रूपकस्य स्वरूपन्तु स्पष्टतामानीतमाचार्यैः किन्तु निर्दुष्टं लक्षणं स्थिरं नाभूत्। कार्यमिदं मम्मटेन सम्यक्तया सम्पादितम्। तेन पूर्वाचार्योक्तसमस्तलक्षणानां समन्वयं विधाय रूपकस्य समन्वयात्मकं संक्षिप्तञ्च यल्लक्षणमुपपादितं



तेन रूपकस्य स्पष्टं स्वरूपं व्यक्तिमाजगाम। तच्च यथा–

**तद्रूपकमभेदो य उपमानापमेययोः।**[11]

**अतिसाम्यादनपह्नुतभेदयोरभेदः॥**[12]

अस्यायं भावः–रूपयत्येकरूपतां नयतीति रूपकम्। तथा च परस्परविरुद्धधर्मत्वेनोपस्थिततया प्रकाशितभिन्नस्वरूपयोः उपमानोमेययोः अतिसाम्यप्रदर्शनाय काल्पनिकोऽभेदारोपो रूपकनामालङ्कारः। यथा मुखं चन्द्रः इत्यादौ मुखत्वचन्द्रत्वरूपपरस्परभिन्नधर्मवत्तया उपस्थितयोः मुखचन्द्रयोः आहार्याभेदनिश्चयः अर्थादभेदारोपः क्रियते अतोऽत्र रूपकम्। निगीर्याध्यवसानरूपायामतिशयोक्तौ उपमेयस्योपयमेयगतधर्मवत्तयोपस्थितिर्न भवति, अत्र तु मुखस्योपमेयस्य मुखत्वेनोपस्थितिर्भवत्येव, अतो न तत्रातिव्याप्तिः। एवमेवापह्नुतौ 'नेदं मुखमपि तु चन्द्रः' इत्यादौ उपमेयस्य निषेधेन भेदस्यापह्नवः, रूपके तु भेदेऽप्यभेदः, अतः तत्रापि नातिव्याप्तिः।

मम्मटकृतेऽस्मिन् रूपकलक्षणे निर्दुष्टतया स्थितेऽपि परवर्तिष्वाचार्येषु रूपकलक्षणमाश्रित्य सूक्ष्मतया विचाराः प्रावर्तन्त। एष्वाचार्येषु शोभाकरः, विद्यानाथः, अपय्यदीक्षितः पण्डितराजजगन्नाथश्च प्राधान्येन रूपकलक्षणं परिश्चक्रुः।

अत्र प्रथमं विद्यानाथेन रूपकलक्षणं परिष्कृतम्। तदनुसारमुपमानोपमेययोराहार्याभेदनिश्चयो रूपकमिति लक्षणे स्वीकृते उत्प्रेक्षातिशयोक्तिससन्देहभ्रान्तिमदपह्नुत्याद्यलङ्कारेष्वतिव्याप्तिभर्वतीति तन्निराकरणायेत्थं लक्षणं कर्त्तव्यम्–

**आरोपविषयस्य स्यादतिरोहितरूपिणः।**
**उपरञ्जकमारोप्यमाणं तद्रूपकं मतम्॥**[13]

लक्षणेऽस्मिन् आरोपविषयस्येति कथनेनोत्प्रेक्षातिशयोक्त्योः व्यावृत्तिः, 'अतिरोहितरूपिणः', इत्यनेन च ससन्देहभ्रान्तिमदपह्नुतीनां व्यावृत्तिः, तेषु सन्देहभ्रान्त्यपह्नवैः विषयस्य तिरोधानात्। उपरञ्जकमित्यनेन समासोक्तिपरिणामव्यावृत्तिः, यतः तत्र विषयेष्वताद्रूप्यापादकत्वलक्षणमुपरञ्जकत्वं न भवति। समासोक्तौ व्यवहारमात्रसमारोपेण ताद्रूप्यप्रतीतेरभावात्। एवमेव परिणामेऽपि आरोप्यमाणस्यैव विषयताद्रूप्यापत्त्या विषयस्यारोप्यमाणताद्रूप्यापत्त्यभावात्।

विद्यानाथोक्तस्य अस्य लक्षणस्य खण्डनं विधायाप्पयदीक्षितेन स्वलक्षणं स्थापितम्। खण्डयता तेनोक्तम्–

''आरोपाध्यवसाययोः कीदृशं भेदमभिसन्धाय 'आरोपविषयस्य' इत्यनेनोत्प्रेक्षा-

व्यावृत्तिरुच्यते? यदि विषयविषयिणोः अभिहितयोरभेदप्रतिपत्तिरारोपः, विषयनिगरणेन विषयिणस्तदभेदप्रतिपत्तिरध्यवसाय इति भेदमभिसन्धाय तदा उत्प्रेक्षा आरोपमूलैव स्यात्। तत्र ''नूनं मुखं चन्द्रः'' इति विषयस्य मुखस्याप्यभिधानेन तन्निगरणाभावात्। ततश्च तत्रातिव्याप्तिरनिवारितैव स्यात्।''[14]

स्वाभिमतं रूपकलक्षणञ्च तेनोक्तम्–

**बिम्बाविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते।**
**उपरञ्जकतामेति विषयी रूपकं तदा॥**[15]

लक्षणस्यास्य पदकृत्यञ्च तेनेत्थं व्यवस्थापितम्– ''बिम्बाविशिष्ट इति विशेषणात् निदर्शनायां नातिव्याप्तिः तत्र सर्वत्र बिम्बभावापन्नवस्तुविशिष्ट एवोपमेये तत्प्रतिबिम्बविशिष्ट-मुपमानमुपरञ्जकमिति न क्वाप्यतिव्याप्तिः। रूपके तु न क्वचिदपि बिम्बप्रतिबिम्बभावापन्नधर्म-विशिष्टतया विषयविषयिणोरुपादानम्। निर्दिष्ट इति विशेषणात् न निगीर्णविषयायामति-शयोक्त्यामतिव्याप्तिः। 'अनिह्नुते' निषेधास्पृष्ट इति विशेषणादपह्नुतौ नातिव्याप्तिः। उपरञ्जकतामाहार्यताद्रूप्यनिश्चयगोचरतामेतीत्यनेन ससन्देहोत्प्रेक्षासमासोक्तिपरिणामभ्रान्तिमत्स्वति-व्याप्तिनिरासः, ससन्देहोत्प्रेक्षयोः निश्चयस्यैवाभावात्। समासोक्तौ परिणामे च तस्य ताद्रूप्यागोचरत्वात्। ''भ्रान्तिमति सत कल्पितस्य वा प्रवृत्त्यादिपर्यन्तस्य स्वारसिकस्यैव भ्रमस्य निबन्धेन तस्यानाहार्यत्वात्।''[16]

प्रसङ्गेऽस्मिन् चित्रमीमांसाकृता भोजराजकृतसरस्वतीकण्ठाभरणोक्तं लक्षणमपि निरस्य यत्पूर्वोक्तं रूपकलक्षणं व्यवस्थापितं तस्य निर्दुष्टतापि चिरस्थायित्वं न लेभे। सद्य एव पण्डितराजेन दीक्षितस्यापि लक्षणं निरस्य यल्लक्षणं निर्णीतं तदद्यावधि प्रतितिष्ठति। तच्च यथा–

**''उपमेयतावच्छेदकपुरस्कारेणोपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकम्। तदोवोपकारकत्वविशिष्टमलङ्कारः॥''**[17]

इत्येवंरूपेण लक्षणे कृते विभिन्नालङ्कारेषु रूपकलक्षस्यातिव्याप्तिः यथा न भवति तथा तेनेत्थं व्याख्यातम्–

**''उपमेयतावच्छेदकपुरस्कारेणेति विशेषणादपह्नुतिभ्रान्तिमदतिशयोक्ति-निदर्शनानां निरासः।''**[18]

अस्यायं भावः–उपमेयतावच्छेदकपुरस्कारेणेति कथनस्येदं तात्पर्यं यत् 'मुखं चन्द्रः' इत्यादिरूपेण उपमेयतावच्छेदकं मुखत्वादिकं पुरस्कृत्य न तु तत्तिरोधाय अर्थादुपमेयवाचक



पदेनैव उपमेयस्योपास्थितौ न तु तद्भिन्नेन चन्द्राद्युपमानपदेनोपमेयोपस्थितौ। एतेन 'नेदं मुखमपि तु चन्द्रः' इत्याद्यपह्नुतौ नातिव्याप्तिः, यतो हि अत्र उपमेयतावच्छेदकस्य मुखत्वस्य स्वेच्छयैव निषेधः। भ्रान्तिमत्यपि नातिव्याप्तिः, यतः ''पद्ममिति भ्रमरा मुखमभिधावन्ति'' इत्यादौ भ्रान्तिस्थले भ्रमजनकेन दोषेणैव तस्योपमेयतावच्छेदकस्य प्रतिबन्धः, अतः तथोपस्थित्यभावान्नातिव्याप्तिः।

**अतिशयोक्तिनिदर्शनयोश्च साध्यवसानलक्षणामूलकत्वात् उपमेय-तावच्छेदकस्य नास्ति पुरस्कारः॥**[19]

'चन्द्रोऽयम्' इत्याद्यतिशयोक्तिस्थले, तथा च–

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥**[20]

इत्यादिनिदर्शनास्थले च साध्यवसानां लक्षणामाश्रित्य वाक्यार्थः पर्यवस्यति, अतस्तत्र उपमेयतावच्छेदकपुरस्कारेण उपमेयस्योपस्थितिर्न भवति, अतश्च नानयोरतिव्याप्तिः।

एवमेव लक्षणे 'शब्दादिति' विशेषणात् 'मुखमिदं चन्द्रः' इति प्रात्यक्षिकाहार्य-निश्चयगोचरस्य तादात्म्यज्ञानस्य व्यवच्छेदो जायते। अयं भावः– 'मुखमिदं न चन्द्रः' इति बाधज्ञाने जाग्रति मुखेऽस्मिन् चन्द्रत्वप्रकारकं चाक्षुषं ज्ञानं मे जायताम्'' इतीच्छा-जन्यं यत् 'मुखमिदं चन्द्रः' इत्याकारकं निश्चयात्मकं चाक्षुषं ज्ञानं तदाहार्यम्। अत्रापि यद्यपि मुखचन्द्रयोः तादात्म्यं प्रतीयते, किन्तु नामरूपकम्, आहार्यनिश्चयस्य चाक्षुषत्वेन शाब्दत्वाभावात्, शाब्दज्ञानस्यैकरूपकात्।

लक्षणे 'निश्चीयमानम्' इति विशेषणात् ''नूनं मुखं चन्द्रः'' इत्यादौ सम्भावनात्मके उपमानतादात्म्ये नातिव्याप्तिः, निश्चीयमानतादात्म्यस्यैव रूपकत्वात्। अपि च–

**''उपमानोपमेयविशेषणाभ्यां सादृश्यलाभात् 'सुखं मनोरमारामाः' इत्यादिशुद्धारोपविषयतादात्म्यनिरासः।''**[21]

अयं भावः– लक्षणेऽस्मिन् उपमानोपयेयशब्दप्रयोगादिदं स्वतः सिद्धं यत् रूपके सादृश्यसम्बन्धेनैव तादात्म्यमिष्टम्। ''सुखं मनोरमा रामाः'' इत्यत्र यद्यपि रामासुखयोः तादात्म्यं प्रतीयते किन्तु नेदं सादृश्यमूलकमपि तु कार्यकारणमूलकमतः नात्रातिव्याप्तिः। प्रकारान्तरेणेदं वक्तव्यं यत्– सादृश्यसम्बन्धाज्जायमानायां गौणीसारोपालक्षणायामेव रूपकम्, ''गौर्वाहीकः'' इत्यादिस्थले। सादृश्येतरसम्बन्धाज्जायमानायां शुद्धसारोपलक्षणायां रूपकं न आयुर्घृतम् इत्यादिस्थले।

इत्येवंप्रकारेण स्वरूपकलक्षणं व्याख्याय पण्डितराजेन अपय्यदीक्षितस्य लक्षणं विस्तरेण खण्डितम्। तत्र विशेषेण 'बिम्बविशिष्टे तथा निर्दिष्टे' इत्यनयोः विषयविशेषणयोः खण्डनमतिसूक्ष्मेक्षिकया विहितम्। तदनन्तरं मम्मटस्य रत्नाकरस्य च विस्तरेण खण्डनं विधाय 'रूपकस्थले लक्षणा भवति न वेति'' विषयो विचारितः।

रूपके लक्षणाभावविचारः प्रथमं दीक्षितेनोत्थापितः। तेनोक्तम्– ''वस्तुतस्त्वतिशयोक्तावेव लक्षणा न तु रूपके इति शक्यं व्यवस्थापयितुम्। तथा हि–अतिशयोक्तौ विषयाभिधायि-मुखादिपदाप्रयोगाच्चन्द्रादिपदेनैव तत्प्रत्यायनं कार्यमिति तस्य तत्र लक्षणावश्यमास्थेया। रूपके विषयविषयिणोः स्वस्ववाचकाभिहितयोरभेदप्रतिपत्तिः संसर्गमर्यादयैव सम्भवतीति किमर्थं तत्र लक्षणा, अशक्या च तत्र लक्षणाभ्युपगन्तुम्।''[22]

मतमिदं समर्थयता पण्डितराजेनाप्युक्तम्– ''नामार्थयोरभेदसंसर्गेणान्वयस्य व्युत्पत्ति-सिद्धत्वात् चन्द्राभिन्नं मुखमिति लक्षणां विनैव बोधः। फलस्यान्यथैवोपपत्तेर्लक्षणाकल्पन-स्यान्याय्यत्वात्।''[23] विषयोऽयं विशेषविस्तृतव्याख्यानेन स्पष्टतामर्हतीति नात्र रूपकलक्षणसमीक्षणे विचार्यते, पश्चात् स्वतन्त्रनिबन्धे विचारयिष्यते।

निष्कर्षतयात्रेदं वक्तुं शक्यते यत्– काव्यशास्त्रपरम्परायां रूपकलक्षणविचारो विस्तरेण बभूव। तत्र प्रायः सर्वैराचार्यैः कापि नवीनता स्पष्टता चानायि किन्तु पर्यन्ततः पण्डितराजेन यल्लक्षणं निर्धारितं यथा च व्याख्यातं तथान्येन केनापि नैव। पण्डितराजकृतमिदं लक्षणं परवर्तिभिः सर्वैरङ्गीकृतम्।।

***

## सन्दर्भाः


1. नाट्यशास्त्रम्, 16/57-58
2. नाट्यशास्त्रम्, 16/59
3. भामहकाव्यालङ्कारः, 2/21
4. भामहकाव्यालङ्कारः, 2/23
5. काव्यालङ्कारसारसर्वस्वम्, 1/11
6. काव्यालङ्कारसूत्रवृत्तिः, 4-3-6





7. रुद्रटकाव्यालङ्कारः, 8-38 टीका
8. रुद्रटकाव्यालङ्कारः, 8-38 टीका
9. वक्रोक्तिजीवितम्, 3-20
10. सरस्वतीकण्ठाभरणम्, 4-24
11. काव्यप्रकाश, 10/93
12. तत्रैव वृत्तिः, 10/93
13. प्रताप., पृ.268
14. चित्रमीमांसा, पृ.200
15. चित्रमीमांसा, पृ.211
16. चित्रमीमांसा, पृ.214
17. रसगङ्गाधर, पृ.483
18. रसगङ्गाधर, पृ.484
19. रसगङ्गाधर, पृ.484
20. रघुवंशमहाकाव्यम्, 1/4
21. रसगङ्गाधर, पृ.484
22. चित्रमीमांसा, पृ.206
23. रसगङ्गाधरः, पृ.544


***

# अन्वीक्षावैशिष्ट्यम्

**डॉ. सिद्धिदात्री भारद्वाजः**

लोकेऽवलोक्यते यत् प्रतिपित्सुः प्रत्यक्षेणान्येन वा प्रमाणेन अर्थमुपलभते। तत्रोपादेयं प्रति उपादेयबुद्धिः हेयम्प्रति हेयबुद्धिश्च तस्योदेति। तर्कसहाय एवासौ अभ्यवहरणयान-शयनादिसुखोपायेषु प्रवर्तते दुःखसाधनेभ्यः कण्टकादिभ्यश्च निवर्तते। तर्कसाहाय्येनैवास्य यथा चक्षुरादिना भूतलादेरुपलम्भस्तथैव घटाभावादेरिति न तिरोहितं विवेचकानाम्।

**यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥**[1]

इत्याद्यभियुक्तोक्त्या यद्यपि तर्काणां तर्काभासतापादनं भवतीति प्रतीयते तथापि तर्कमात्रस्य अप्रतिष्ठितत्वं न शक्यते वक्तुम्। यस्यापि तर्कस्य शब्दामूलकस्याप्रतिष्ठितत्वं भवति तद्विज्ञानमपि न तर्कमन्तरा सुशकं भवति। अतो हेतोरेतन्निश्चप्रचं वक्तुं शक्यते यद् हानोपानादिसकललोकयात्रानिर्वाहकत्वं तर्कस्येति सर्वप्रमाणसहकारिता तस्य निर्बाधेति।

अत एव श्रुतेः प्रामाण्ये बद्धादरैः भगवत्पादैः स्पष्टमङ्गीक्रियते न समेषां तर्काणाम-प्रतिष्ठितत्वमिति अप्रतिष्ठितत्त्वं तर्कस्यालङ्कार एवेति च। तद्यथा–''सर्वतर्काप्रतिष्ठायाञ्च लोकव्यवहारोच्छदेप्रसङ्गः। अतीत–वर्तमानाध्वसाम्येन ह्यनागतेऽप्यध्वनि सुखदुःखप्राप्ति-परिहाराय प्रवर्तमानो लोको दृश्यते'' इति।[2] ''अयमेव तर्कस्यालङ्कारो यदप्रतिष्ठितत्त्वं नाम।'' इति च।[3]

तर्कविद्या न्यायविद्या वा आन्वीक्षिकीशब्देनापि गीयते। प्रत्यक्षेण आगमेन वा ईक्षितस्य यद् अन्वीक्षणं सान्वीक्षेत्युच्यते। तया प्रवर्तते ततः न्यायविद्या आन्वीक्षिकीव्यपदेशं लभते। अथ नीयते विवक्षितार्थसिद्धिरनेनेति न्यायः, तच्च परार्थानुमानम्। पञ्चावयवात्मके हि परार्थानुमाने चतुर्णां प्रमाणानामभिसम्बन्धो राराजते। यथा प्रथमावयवः प्रतिज्ञा सा चागमः। द्वितीयस्तु हेतुः, तदनुमानम्। तृतीयं पुनरुदाहरणम् तच्च प्रत्यक्षम्। चतुर्थोऽवयवः



उपनयः, स चोपमानम्। पञ्चमोऽवयवः निगमनम्। अनेन पुनः सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं विधीयते। एतादृशमत्यन्तमुपयोगिनं न्यायं सपरिकरं प्रतिपादयद् न्यायविस्तर-समाख्यं शास्त्रं चतुर्दशसु अष्टादशसु वा विद्यास्थानेषु अभ्यर्हिततमं भातीति नाविदितं प्रेक्षावताम्।

न्यायविद्येयं प्रमाणविद्याशब्देनाप्यभिधीयते। सर्वासु न्यायविद्याभिन्नासु विद्यासु न्याय-विद्याप्रतिपाद्यं प्रमाणमुपजीव्य स्वकीयं विवक्षितमर्थतत्त्वं प्रतिपाद्यते। यथा व्याकरणशास्त्रवेत्तरि पदज्ञशब्दः प्रयुज्यते यथा वा मीमांसाशास्त्रवेत्तरि वाक्यज्ञशब्दः प्रयुज्यते तथैव न्यायशास्त्रविदि प्रमाणज्ञशब्दः प्रयुज्यते। भगवत्पादाः न्यायविद्याविद्योतितान्तःकरणं नितान्तं श्रद्धेयं मन्वते। तत एव तु प्रमाणशब्दोदितन्यायविद्यावेदितृतया आचार्यबादरायणं महीकुर्व-द्भिरेभिः तद्विषये ''पदवाक्यप्रमाणज्ञेनाचार्येण''[4] इत्येवं पदकदम्बः प्रयुज्यते।

अन्योऽप्येष हेतुरस्या प्रमाणविद्याभिधाने यदियं प्रमाणमीश्वरं व्युत्पादयति। यदाहुर्न्याय-सूत्रकृतः–''मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्याद्''[5] इति न्यायाचार्या उदयनाचार्या अप्याहुः–''तन्मे प्रमाणं शिवः''[6] इति च।

तदिदं सर्वज्ञस्येश्वरस्य प्रमाणत्वं प्रतितन्त्रसिद्धान्तरूपेण प्रतिष्ठितं विद्यते। अत एव वरदराजाचार्यस्येयमुक्तिर्विलसति–''प्रतितन्त्रो यथा न्याये सर्वज्ञस्य प्रमाणता''[7] इति।

श्रुतिरपि स्वार्थबोधने विद्यामिमां नितरामपेक्षते तर्हि का कथा अन्यासां विद्यानां विषये? तत एव तु ''आदित्यो यूपः'' इत्यत्र ''आदित्यसदृशता तेजस्विता'' यूपस्य आन्वीक्षिकी–परिशोधितप्रमाणमपेक्ष्य प्रतिबोध्यते न तु साक्षात् श्रुता आदित्यता।

भगवान् मनुः धर्मबोधकत्रय्यादीनामुपकारकत्वं स्फुटमङ्गीकुरुते तर्कविद्यायाः। यथोक्तम्–

**आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥**[8] इति

महामतिः कौटिल्यः ''सर्वासां विद्यानामियमुपकरोति''[9] इति वात्स्यायनोक्तिं समर्थयन्भृशं स्तौति विद्यामेनाम्–

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥**[10] इति

आचार्यजयन्तभट्टेन न्यायशास्त्रस्य दृढ़तरवेदप्रामाण्यप्रत्ययाधायकता प्रतिपाद्यते। तद् यथा-''तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढ़तरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षममि-

दमक्षपादोपदिष्टं न्यायविस्तराख्यं शास्त्रम्।''[11]

**आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती।**
**विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः॥**[12]

इत्यत्र प्रथमा विद्या आन्वीक्षिकी प्रमाणप्रमेयसंशयादिप्रस्थाना प्रमेयस्य आत्मादेः तत्त्वज्ञानोपजननद्वारा निरतिशयपुरुषार्थमपवर्गसंज्ञमुपलम्भयति। अत एव भगवान् मनुरान्वीक्षिकीमात्मविद्यां सुस्पष्टं प्रतिपादयति। तद्यथा–

**त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्।**
**आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः॥**[13] इति

औपनिषदाः भगवत्पादा विद्यामिमां स्तोतुं तत्प्रवर्तकाचार्यं सबहुमानमादरयन्ति– ''तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्– दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति।[14] श्रुतिप्रसिद्धा एषा। छान्दोग्योपनिषदि अस्या विद्यायाः कृते वाकोवाक्यशब्दः प्रयुज्यते। तद्यथा–''ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनम्''[15] इति। ''वाकोवाक्यं तर्कशास्त्रम्''[16] इति भगवत्पादेन विवृतम्। याज्ञवल्क्येन इयं तर्कशब्देन विद्यास्थानमध्ये कीर्त्यते। तद्यथा–

**पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥**[17] इति।

आचार्यमणिकण्ठमिश्रा न्यायदर्शनस्य संस्कृतवाङ्मये समुन्नतं स्थानं प्रतिपादयन्ति। तद्यथा–

''लोकयात्रानिर्वाहकतया सर्वोपजीव्यस्यानुमानस्य, विप्रतिपन्नपुरुषप्रतिपादकतया श्रेष्ठस्य सपरिकरस्य न्यायस्य, सर्वविद्यापेक्षितप्रमाणादेश्च व्युत्पादनेन, प्रवर्तनारूपकार्ये स्वप्रतिपाद्यनिर्णये च सर्वासां विद्यानां बहूपकारकरणेन, वेदप्रामाण्यव्यस्थापनेन, अपवर्गसाधनोपदेशपरत्वेन, श्रुतिस्मृतिसम्मतत्वेन च वाङ्मये उन्नतं पदमधिरूढ़ं विलसति न्यायदर्शनम्।''[18] इति

वेदवच्च न्यायविद्यायास्तदन्यविद्यायाश्च सदा वर्तमानता प्राचीनता चाभ्युपेयते। अत एवाहुर्जयन्तभट्टाः–''आदिसर्गात् प्रभृति वेदवदिमा विद्याः प्रवृत्ताः। संक्षेपविस्तरविवक्षया तु तांस्तान् तन्त्रकर्तॄन् आचक्षते।''[19] इति।

तत्राचार्यगोतमः तर्कशास्त्रस्य चरमं प्रयोजनम् अपवर्गप्राप्तिं प्रतिपादयति। तन्मतानुसारं



तत्त्वज्ञानं निःश्रेयसाधिगमे हेतुरङ्गीक्रियते। एवञ्च शास्त्रेणानेन तत्त्वज्ञानोदये मिथ्याज्ञानं नश्यति, तदनन्तरं कारणनाशात् कार्यनाश इति मिथ्याज्ञानाधीनोत्पत्तिकस्य दोषस्य निवृत्तिर्भवति। तदनन्तरं दोषाल्लब्धजनेः प्रवृत्तेरपगमो भवति। अथ प्रवृत्तिकारणं जन्मापैति। तदनन्तरं जन्माधीनात्मलाभस्य दुःखस्य योऽयमात्यन्तिको नाशः स चापवर्गसंज्ञः निःश्रेयसापरपर्यायो लभ्यते। यथोक्तम्–दुःखजन्मप्रवृत्तिमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः इति।[20]

अथ प्रमाणादिनां षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति प्रतिज्ञाने यतः प्रमाणाधीनता प्रमेयादीनां ततः प्रमाणप्राधान्यमिति शास्त्रमिदं प्रमाणस्य सुविशदं निरूपणं प्रकुरुते। व्युत्पत्त्यैव च प्रमाणशब्दः प्रमाणलक्षणं प्रस्तौति। तद्यथा–प्रमीयते येन तत्प्रमाणं प्रमाकरणमिति यावत्।[21]

तच्च प्रमाणं न्यायमते चतुर्विधम्–प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दश्चेति। तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षं प्रमाणम्। प्रत्यक्षप्रमा नाम तज्ज्ञानं यद् इन्द्रियस्यार्थेन सम्बन्धाद् उत्पद्यते अर्थञ्च न व्यभिचरति। सेयं प्रत्यक्षप्रमा द्वेधा भिद्यते–निर्विकल्पकज्ञानं सविकल्पकज्ञानं चेति। द्विविधमप्येतत् प्रत्यक्षं ज्ञानं येन जायते तत् प्रत्यक्षं प्रमाणमित्युच्यते। यदुक्तम्–इन्द्रियार्थसन्निकर्षोत्पन्न............।[22]

किन्तावदनुमानमिति जिज्ञासायामुच्यते। साध्यसाधनयोः व्याप्त्याख्यसम्बन्धप्रत्यक्षमेकम्, हेतोः पक्षे प्रत्यक्षञ्चेति द्वितीयम्। तदेतत्प्रत्यक्षद्वयाधीनोत्पत्तिकं लिङ्गपरामर्शरूपमनुमानम्प्रमाणमित्याख्यायते। तच्च त्रिविधम् भवति-पूर्ववत् शेषवत् सामान्यतोदृष्टञ्चेति। यत्र कारणेन कार्यानुमानं तत् पूर्ववदित्युज्यते। यत्र कार्येण कारणानुमानं भवति तत् शेषवदित्युच्यते। तदुभयभिन्नन्तु सामान्यतोदृष्टमनुमानमित्याख्यायते। यदुक्तम्–

**पूर्ववच्छेषवत् सामान्यतो दृष्टञ्चेति।**[23]

अथ प्रज्ञातो यो गवादिः, तेन सह सादृश्यज्ञानात् ''गवयो गवयपदवाच्यः'' इत्येवं संज्ञासंज्ञिसम्बन्धज्ञानं यदुदेति सा उपमितिः प्रमा इत्युच्यते। उपमितेः करणमुपमानमित्युच्यते। यथा प्रकृते गवयपिण्डे गोसादृश्यज्ञानम् उपमानं प्रमाणमित्युच्यते।

अथ आप्तकर्तृकः उपदेशः शब्दप्रमाणम्। स च द्विविधः–दृष्टार्थकः अदृष्टार्थकश्चेति। यदुक्तम्– ''आप्तोपदेशः शब्दः''[24] इति।

न्यायशब्दो यथा सम्पूर्णस्य न्यायशास्त्रस्य कृते प्रयुज्यते तथैव परार्थानुमानस्य कृतेऽपि। वस्तुतस्तु परं प्रतिबोधयितुं पञ्चावयवप्रयोगद्वारा यदनुमानम्भवति तस्यैव तर्कशास्त्रे

प्राधान्यात् तादर्थ्यात् ताच्छब्द्यम्–इति न्यायेन सम्पूर्णं तर्कशास्त्रं न्यायशास्त्रमित्युच्यते। प्रमाणैः (अनुमानप्रधानैः) अर्थपरीक्षणं न्यायः इत्यभियुक्तोक्तिरपि एतदनुगुणतामर्हति। न्यायसूत्रकृता न्यायशब्दार्थममुं विवेचयितुम् अष्ट सूत्राणि अवतारितानि। भवति हि प्रतिज्ञादिभिः पञ्चभिरवयवैः साधनीयस्य अर्थस्य सिद्धिरिति तावान् शब्दसमूहः पञ्चावयवात्मा न्याय इत्यभिधानं लभते। तत्र साध्यनिर्देशः प्रतिज्ञा इत्यभिधीयते। यथा शब्दो नित्यः उत्पत्तिधर्मकत्वादित्यत्र शब्दोऽनित्यः इति प्रतिज्ञावाक्यं भवति। अत्र विधेयभूतानित्यत्व-विशिष्टः शब्दः धर्मी साध्यं विद्यते। श्रुते च 'शब्दोऽनित्य' इति वाक्ये कुत इत्येवं जायमानाया जिज्ञासायाः समाधानाय प्रयुज्यमानम् ''उत्पत्तिधर्मकत्वादिति'' वाक्यं हेतुरित्युच्यते। अथ हेतुः साध्यं कथं गमयतीति जिज्ञासायां प्रयुज्यमानं वाक्यमुदाहरणमित्युच्यते। उदाह्रियते हेतुसाध्ययोः साध्यसाधनभावः अनेनेति उदाहरणमित्येवमस्याप्यन्वर्थता बोध्या। साधर्म्योदाहरणं वैधर्म्योदाहरणं चेति द्वैविध्यमुदाहरणस्येष्यते। अत्र यद् यदुत्पत्तिधर्मकं तदनित्यं यथा घटादिकमिति साधर्म्यो-दाहरणवाक्यं भवति। यदनित्यं न भवति तदुत्पत्तिधर्मकं तदुत्पत्तिधर्मकं न भवति यथा आकाशादिकमिति तु वैधर्म्योदाहरणवाक्यं भवति। अथ साध्यव्याप्तो हेतुः पक्षे अस्ति न वेति जिज्ञासायां पक्षे हेतुसत्त्वबोधकं वाक्यं यत्प्रयुज्यते तदुपनयवाक्यम्। प्रकृते ''तथा चायं = शब्दः उत्पत्तिधर्मकः इति उपनयः साधर्म्योदाहरणस्थले इष्यते। वैधर्म्योदाहरणस्थले तु ''न चायं तथेति'' उपनयवाक्यं प्रयुज्यते। अयं शब्दः अनुत्पत्तिधर्मको न, प्रत्युत उत्पत्तिधर्मक इति तदर्थः। तदनन्तरं निगमवाक्यं प्रयुज्यते। तद्यथा ''उत्पत्तिधर्मकत्वादनित्यः शब्दः'' इति। अत्र प्रतिज्ञादीनां चतुर्णामपि एकार्थसमवाये सामर्थ्यप्रदर्शनद्वारा निगम्यन्ते सम्बन्ध्यन्ते प्रतिज्ञादयः एकत्रेति निगमनमिति अन्वर्थताऽ-वधेया।

तदेवं पञ्चावयववाक्यं परार्थानुमाने प्रयुज्यते। तच्च न्यायशब्देन शब्द्यते।

परार्थानुमानस्य न्यायस्य प्रवृत्तौ अपि यस्य वस्तुनः तत्त्वं विज्ञायमानं न भवति तत्र संशयः समुदेति–किमिदं प्रतीयमानम्–इत्थं विद्यते अनित्यं वेति। अस्य संशयस्य निवर्तनं तर्केण विधीयते। तर्केण हि एकतापक्षे अनिष्टप्रसञ्जनं भवति अथान्यतरपक्षस्य निर्णयो जायते। तदित्थम्–एवं स्याद् नैवं स्यादित्यूहस्तर्क इत्युच्यते। तदुक्तम् – ''अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः'' इति। तर्को हि यथा अनुमानमनुगृह्णाति तथा प्रमाणान्तरमपि। तथा च विपरीतकोटौ अनिष्टस्य प्रसक्तिं दर्शयता तर्केण प्रमाणमनुगृह्यते। अनुगृहीतेन च प्रमाणेन संशयनिवृत्तिद्वारा तत्त्वनिर्णयो यज्जायते



तदेव तर्कस्य फलमिति विवेकः। यदुक्तम्–

**नहि तत्करणं लोके वेदे वा किञ्चिदीदृशम्।**
**इतिकर्तव्यता साध्ये यस्य नानुग्रहेऽर्थिता॥** इति

न च तर्कनिर्णयं बिना लोकयात्रानिर्वाहः सुशक इति तर्कशास्त्रस्य महती उपादेयता नितरामनपलपनीया प्रतिभाति।

न्यायशास्त्रे कथाया अतिविशिष्टं महत्त्वमुपवर्णितमास्ते। तत्र कथा नाम–विचारगोच-रार्थविषयः नानावक्तृभिः प्रयुज्यमानो वाक्यसमूहः। अस्याश्च कथायाः षडङ्गानि प्रथन्ते–(1) निरूप्यनिरूपकनियमः, (2) कथाविशेषव्यवस्था, (3) वादिप्रतिवादिनियमः, (4) सदस्यानुविधेयसंवरणम्, (5) निग्रहस्थान–सामस्त्यासामस्त्योद्भावनप्रतिज्ञानम्, (6) कथापर्यवसानसंवित्तिश्चेति।

वादिप्रतिवादिसंमता विषमसंख्याकाः त्र्यवराः सभ्याः स्वीकार्याः। सदस्यानां मुख्यतया चत्वारि कर्माणि निम्नाङ्कितानि भवन्ति–(1) प्रमेयविशेषस्य, कथाविशेषस्य वादिप्रतिवादिनोश्च नियमनम्, (2) पर्यनुयोजन्यादिना कथकगुणदोषावधारणम्, (3) भग्नप्रतिबोधनम्, (4) मन्दस्यानुभाष्यप्रतिपादनम्।

सैषा कथा त्रिविधा–वादः जल्पो वितण्डा चेति। तत्र वादकथायां वादिभ्याम् स्वपक्ष-स्थापनं परपक्षनिषेधश्च प्रमाणैः तर्कैश्च कर्त्तव्यं भवति। स्वसिद्धान्ताविरोधितया पञ्चावयवो-पपन्नं वाक्यं प्रयोक्तव्यं भवति। तत्त्वनिर्णयफलकत्वमस्य वादस्येष्यते। प्रमेयादिव्यसस्थायै वादे सदस्याङ्गीकारावश्यकता न भवति। विजिगीषुकथैव विजयप्रयोजना चेज्जल्प इत्याख्यायते। स्थापनाहीनो जल्प एव वितण्डेत्युच्यते। अत्र केवलं परपक्षः दूष्यते प्रतिपक्षस्थापना नात्र भवति।

''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।[26] इत्यादिश्रुत्या मोक्षं प्रति आत्मतत्त्वसाक्षात्कारस्य हेतुता स्पष्टं प्रतीयते। कथमिति चेद् नैयायिकाः प्रतिपादयन्ति–दुःखजन्मप्रवृत्तिमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः इति। ततश्चेदं प्रतिफलितं भवति–आत्मतत्त्वसाक्षात्कारः आत्मविषयकमिथ्याज्ञाननिवर्तनद्वारा मोक्षहेतुतां व्रजतीति। न च श्रवणमात्रेण सर्वस्यात्मसाक्षात्कारः समुदेति तत एव आत्मविषयकमनन-स्याप्युपदेशः श्रुतौ प्राप्यते एवञ्च यद्विषयकः साक्षात्कारो मोक्षं जनयति तद्विषयकमननमपि मोक्षे उपयुज्यते। आत्मपदेन चैतन्मते ईश्वरः परिगृह्यते।'' तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'' इत्यत्र[27] मृत्यूत्तरणे ईश्वरस्यैव प्रकृतत्वात्। एवञ्चेश्वरमननस्य

मोक्षोपयोगिता आयाति। अत एवोक्तिरियं संगच्छते–''स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोति।'' इति।

आत्मविशेष्यकेतरभिन्नत्वप्रकारकं मननं मुक्तिसाधनं यत इष्यते ततः प्रमाणादीनां पदार्थानां निरूपणं न्यायनये विधीयते। नहीतरपदार्थज्ञानं विना तद्भिन्नत्वप्रकारकत्वं मननस्य शक्यविज्ञानं भवितुमर्हत्ति।

तमेव विदित्वेत्यादिश्रुतिस्वारस्यात् आत्मपदमीश्वरग्राहकं नितरामेष्टव्यं भवति। ततश्च ईश्वरज्ञानं मुक्तिसाधनमिति निर्बाधम्। परम् ईश्वरस्य किं लक्षणम्? किं वा तत्र प्रमाणम्? इति जिज्ञासायां श्रुतिः अनुमानञ्चेति प्रमाणद्वयं समाधानाय एष्टव्यम् भवति।

''एक एव रुद्रो न द्वितीयाय तस्थे य इमान् लोकानीशते ईशिनीभिः'' इति श्रुत्या। सकलपुरुषाधिष्ठाता संसारधर्मैरीषदपि असंस्पृष्टः भगवान् सर्वज्ञोऽनादिः शिवः इति महेश्वरस्वरूपमवगम्यते। अनुमानेन तु ईश्वरे प्रमाणमवाप्यते। तद्यथा–

''आत्मा इतरेभ्यो भिद्यते आत्मत्वाद्। यन्नैवम्, यथा घटादिः, न चायं तथा यतस्तस्मात्तथेति।

अनेन चानुमानेन पारिशेष्यादीश्वरः सिद्ध्यति। अयमत्र विशेषः। व्याप्तिज्ञानमनुमिति–करणमित्युच्यते तदेव चानुमानम्। यतश्च तर्कस्य व्याप्तिज्ञानं प्रति कारणता भवति ततोऽस्यानुमितिम्प्रत्यपि कारणता प्रतिपादिता भवति। तृणारणिमणिन्यायेन तर्कस्य व्याप्तिज्ञानम्प्रति हेतुता अवसीयते। यथा अरणिं विना तृणेन, तृणं विना अरणिना, एतदुभयं विना मणिना सूर्यकान्तादिना वह्निर्जन्यते। बह्नित्वावच्छिन्नं प्रति व्यतिरेकव्यभिचारेण तृणत्वादिना कारणात्वाभावेऽपि, तृणजन्यवह्निं प्रति तृणस्येव, अरणिजन्यवह्निं प्रति अरणेः मणिजन्यवह्निं प्रति वह्नेर्वा कारणत्वमिष्यते। तथैव तर्कजन्यव्याप्तिज्ञाने तर्कः कारणम्। व्याघातजन्यवाप्तिज्ञाने व्याघातः कारणम्, आप्तोपदेशजन्यव्याप्तिज्ञाने आप्तोपदेशः कारणम् भवति।

तर्कत्वं किमिति चेदुच्यते। ज्ञानत्वस्य व्यापकस्य सामान्यस्य व्याप्यभूतं यत्सामान्यं तद्विशेषत्वं तदिति। एवं लक्षणलक्षितस्तर्क इष्यते। अस्मिन् जातिविशेषे तर्कयामीति अनुगतस्यानुव्यवसायस्य साक्षिता बोध्या। यतश्च तर्के उभयकोट्यनुल्लेखः ततोऽस्य नान्तर्भावः संदेहे भवितुमर्हति। अथ निर्धूमोऽयमित्येवमात्मनि निश्चयेऽपि न तर्कस्यान्तर्भावो वक्तुं शक्यते, अनुभवविरोधात्। सर्वो हि लोकः प्रत्येति ''निर्धूमः स्यादिति तर्कयामि'' इति। न च प्रत्येति– ''निर्धूमोऽयमिति निश्चिनोमि''–इति। प्रमात्वादिना सांकर्यात् तर्कत्वं न जातिर्भवितुमर्हति। कथं सांकर्यमिति चेदुच्यते– ''अयं घटः'' इति प्रमायां प्रमात्वं



विद्यते तर्कत्वं तु न वर्तते। अथ ''यद्यग्निर्न स्यात्तर्हि धूमोऽपि न स्याद् इति तर्के तर्कत्वं विद्यते प्रमात्वं नास्ति। उभयं चैतद् विद्यते ''यद्यतिथिरागच्छेत् स भोजयितव्यः आगच्छति भोज्यते चेति'' तर्के तर्कत्वं प्रमात्वञ्चेति। तदेवं सांकर्यात् तर्कत्वं न जातिरिति प्रसज्यते। किन्तु जातिसंकरः जातिबाधको नेष्यते। अतो न किमपि दूषणमिति। अथ जातिसंकरस्य यदि जातिबाधकता नेष्यते तर्हि व्यक्तेरभेदस्य तुल्यताया वा जातिबाधकत्वानभ्युपगम आपद्येत तथा च आकाशत्वमपि जातिः स्यात् सामान्यमपि सामान्याश्रयः स्यात्। सति चैवम् उपाधिमात्रस्य विलोप आपद्यते– इति। अतः तर्कत्वमन्यथा व्याख्यातव्यम्। तथाहि– व्याप्यारोप्यत्वेन व्याप्यारोपजन्यो यो व्यापकारोपस्तत्त्वं तर्कत्वमिति। शाब्दज्ञाने अतिव्याप्तिवारणाय व्याप्यत्वारोपेणेति पदोपादानम्। ''यद्यतिथिरागच्छेत्स भोजयितव्यः स्याद्'' इत्यादौ तर्कलक्षणस्याव्याप्तिः स्यादिति तु नाशङ्कनीयम्। संशयात्मकस्य तस्य तर्कात्मकत्वाभावाद् लक्ष्यबहिर्भूतत्वात्त्र च लक्षणस्यागमनस्य भूषणत्वात्। एवञ्च लक्षणप्रमाणान्वितस्य तर्कस्य आन्वीक्षिक्यां विद्यायामतीव महत्त्वं राराजते।

## सन्दर्भाः


1. विश्रुतमेतत्
2. विश्रुतमेतत्
3. विश्रुतमेतत्
4. ईक्षत्यधिकरणेशा. भाष्यम्
5. न्यायसूत्रम् ...
6. न्यायकुसुमाञ्जापि...
7. तार्किकरक्षा ...
8. मनुस्मृति
9. न्यायवार्तिकम्
10. अर्थशास्त्रम्
11. न्यायमञ्जरी
12. कौटिलीयमर्थशास्त्र
13. मनुस्मृति
14. शारीरक भाष्य
15. छान्दो. 340
16. तदेव
17. याज्ञवलक्यस्मृतिः
18. न्यायरत्नम् मणिकण्ठमिश्रविरचितम्, उपाद्धातः, पृ.6
19. न्यायमञ्जरी
20. न्यायसूत्रम्
21. करणाधिकरणयोश्चेति करणे...
22. न्यायसूत्रम्
23. न्यायसूत्रम्
24. विश्रुतमेतत्
25. विश्रुतमेतत्


***

# नैषधीयचरिते उपवनस्योद्दीपनत्वम्

डॉ. बबुआ नारायण मिश्रः

महाकाव्यस्य वर्ण्यवस्तूनि प्रतिपादयताऽऽचार्यदण्डिना प्रोक्तम्–

**नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः ।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥**
**विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।**
**मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥**
**अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।**
**सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः॥**
**सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।**
**काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति॥[1]**

यद्यप्युर्पयुक्तप्रकारेण महाकाव्यस्य वर्ण्यवस्तूनि परिगणितानि, तथापीदृशं किमपि वस्तु नास्ति यत् कविभावनया भावितं रसत्वं नाप्नुयात्–

**रम्यं जुगुप्सितमुदारमथापि नीच-**
**मुग्रं प्रसादि गहनं विकृतं च वस्तु।**
**यद् वाऽप्यवस्तु कविभावकभाव्यमानं**
**तन्नास्ति यन्न रसभावमुपैति लोके॥[2]**

काव्येषु रसाङ्गत्वेन वस्तून्युपस्थाप्यन्ते। अत एवैकस्यैव वस्तुनो वर्णनं रसभेदेन भिद्यते। सम्भोगवर्णनावसरे यद् वस्तु सुखकारिरूपेण वर्ण्यते तदेव वस्तु विप्रलम्भवर्णनावसरे दुःखकारिरूपेण वर्ण्यते। इदमेव कविवर्णनवैशिष्ट्यम्।

वस्तुवर्णनवैशिष्ट्यादेव महाकविश्रीहर्षविरचितं नैषधीयचरितमतीव प्रथितं विद्वत्सु।



अत्र वर्णितेषु वस्तुषूपवनवर्णनं विशिष्यते। नैषधीयचरिते उपवनवर्णने शास्त्रानुपालनं स्वाभाविकं दृश्यते। उद्यानवर्णनविषये शास्त्रीयनिर्देशो विद्यते–

**उद्याने सरणिः सर्वफलपुष्पलताद्रुमाः।**
**पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगस्थितिः॥[3]**

सर्वेषामुपर्युक्तवस्तूनां चित्रणं नैषधीयोपवनवर्णनप्रसङ्गे दृश्यते। संसारानलसन्तप्ता जना वनमुपवनं वा संसेव्य शान्तिमधिगच्छन्ति। नैषधीयचरिते नलोऽपि विरहव्यथितः सन् विलासकाननं याति–

**विवेश गत्वा स विलासकाननं ततः क्षणात्क्षोणिपतिर्धृतीच्छया।**
**प्रवालरागच्छुरितं सुषुप्सया हरिर्धनच्छायमिवाऽम्भसां निधिम्॥[4]**

विलासकाननं शृङ्गाररसस्योद्दीपनविभावः। विलासकाननस्थानि वस्तूनि तटस्थोद्दीपनत्वेन परिगण्यन्ते–

**तटस्थाश्चन्द्रिका धारागृहचन्द्रोदयावपि।**
**कोकिलालापमाकन्दमन्दमारुतषट्पदाः॥**
**लतामण्डपभूगेहदीर्घिकाजलदारवाः॥**
**प्रासादगर्भसंगीतक्रीडादिसरिदादयः।**
**एवमूह्या यथाकालमुपभोगोपयोगिनः॥[5]**

उद्दीपनविभावा रसमुद्दीपयन्ति–

**उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये॥[6]**

प्रकृते विलासकाननं विप्रलम्भस्योद्दीपीनम्, प्रेक्षकस्य विप्रयोगित्वात्। विरहिणा नलेनोपवने प्रथमं केतकमालोकितम्–

**धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन्।**
**प्रसूनधन्वा शरसात्करोति मामिति क्रुधाऽऽक्रुश्यत तेन केतकम्॥[7]**

यदा पुष्पधन्वनो हस्तः पुष्पधनुर्मकरन्देनाऽऽर्द्रो भवति तदा तेन केतकपुष्पपरागेण हस्तं धूलियुक्तं कृत्वा भीमजासक्तो नलः शरसात् क्रियत इति कविकल्पनम्। एवं केतकस्य कामोद्दीपकत्वमभिव्यज्यते।

केतकस्य कामोद्दीपकत्वाद् युवत्योऽपि प्रणयिजनचित्तापहरणाय केशेषु केतकपुष्पाणि धारयन्ति। युवकैः केतकपुष्पमकरन्देन वस्त्राणि सुगन्धीक्रियन्ते। सुगन्धितद्रव्यं सुन्दरीणामा-

कर्षणस्य साधनम्। अत एव कामशास्त्रज्ञेन पद्मश्रीपण्डितेनोक्तं यद् यदि सौन्दर्यविद्या-मदगर्विताभिः सुन्दरीभिः सम्भोगसञ्जातसुखमिच्छेत् तर्हि मन्मथशास्त्रवेदी पुरुषो नानाविधा-मोदविदग्धवासैर्निजं शरीरं साधु प्रसाधयेत्–

**प्रज्ञाकलायौवनजातिसम्पत्–**
**सौन्दर्यविद्यामदगर्विताभिः।**
**सुदुर्लभाभिर्वरसुन्दरीभिः**
**सम्भोगसञ्जातसुखं यदिच्छेत्॥**
**कालोचितैर्धूपितधौतवस्त्र-**
**रत्नोज्ज्वलैराभरणैरनेकैः।**
**कण्ठोपकण्ठोल्लसिताग्रपुष्प-**
**स्त्रग्भिश्च मत्तालिकुलाकुलाभिः॥**
**नानाविधामोदविदग्धवासैः**
**श्रीखण्डताम्बूलशुभाङ्गरागैः।**
**नरोत्तमो मन्मथशास्त्रवेदी**
**प्रसाधयेत् साधु निजं शरीरम्॥**[8]

केतकपुष्पं मादकगन्धवत्त्वात् कामोद्दीपकेषु सुगन्धितद्रव्येषु कनिष्ठिकाधिष्ठितम्। एवंविधस्य केतकस्य दर्शनेन गन्धग्रहणेन नलस्य विरहिमनो व्याकुलं सत् कथं न विनिन्द्यात्–

**विनिद्रपत्त्राऽऽलिगताऽलिकैतवान्मृगाङ्कचूडामणिवर्जनाऽर्जितम्।**
**दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम्॥**[9]

इत्थं शिवपरिहारोपार्जितं दुर्यशः धारयत् केतकं गर्हावहम्। गर्हणयाऽनया नलस्य व्याकुलत्वम्, तेन च केतकस्यातिशयकामोद्दीपकत्वमभिव्यज्यते।

उपवने विद्यमानं दाडिमं वर्णयता लिखितं महाकविना श्रीहर्षेण–

**विदर्भसुभ्रूस्तनतुङ्गताऽऽप्तये घटानिवाऽपश्यदलं तपस्यतः।**
**फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि द्रुमे॥**[10]

नायिकाया अङ्गदर्शनमङ्गसदृशवस्तूनां दर्शनं वा नायकस्य कृते उद्दीपकं भवति। प्रकृते दाडिमफलानि आकृत्या कुचसदृशानि। किन्तु, तेषां तुङ्गत्वं दमयन्तीकुचवन्नास्ति। अतः कविना विदर्भसुभ्रूस्तनतुङ्गताऽऽप्तये तपस्यतो धूमस्य धयान् अधोमुखान् घटानिव नलः फलान्यपश्यदिति कल्पितम्।



लोके दाडिमफलं कुचस्योपमानरूपेण प्रसिद्धम्। अत्र लोकप्रसिद्धस्योपमानस्योपमेया-पेक्षया हीनत्वं प्रतिपादितम्। पीनोतुङ्गकुचवत्त्वं पद्मिन्या लक्षणम्–

**प्रान्तारक्तकुरङ्गशावनयना पूर्णेन्दुतुल्यानना।**
**पीनोत्तुङ्गकुचा शिरीषमृदुलाा स्वल्पाशना दक्षिणा।**[11]

कामशास्त्रज्ञैः स्त्रीणां पद्मिन्यादयश्चतस्रो जातयः प्रतिपादिताः। तत्रापि पद्मिनी श्रेष्ठेति विदुषां सम्मतिः–

**पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।**
**उद्देशक्रमतस्तासामुत्तमाधमकल्पना॥**[12]

इत्थमत्र विदर्भसुभ्रूस्तनतुङ्गताऽऽप्तये दाडिमस्य तपश्चरणेन दमयन्त्याः पद्मिनीत्वं व्यज्यते। एवं दाडिमस्य दमयन्त्याः स्मारकत्वादुद्दीपनत्वम्।

उपवने लताः पुष्पिताः सन्ति। सुगन्धितसमीरेण प्रकृतावतीवाभिरामं दृश्यमुपस्थाप्यते–

**नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।**
**दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे॥**[13]

अत्र नलस्योद्दीप्तत्ववर्णनं कवेरभीष्टम्। तदर्थमत्र नैसर्गिकं रतिदृश्यमुपस्थापयति कविः। तिर्यगादिसम्भोगवृत्तान्तावलोकनं कौतूहलमावहति। अत एव दर्शने आदरो वर्तते। पुष्पितलतादिदर्शनेन विरहिहृदयं विदीर्यते। अत एव नलस्य मनसि भयस्यापि भावो वर्तते। शीतलमन्दसुगन्धवायुः प्रणयिहृदये काममुद्बोधयति। प्रकृते गन्धवहस्य कामोद्बोधक-त्वाद् विप्रलम्भस्योद्दीपनत्वम्।

पलाशपुष्पं निर्गन्धमप्यतीव रमणीयं भवति। तस्य सौन्दर्येऽपि नलेन बीभत्सरूपमेव दृश्यते–

**स्मराऽर्धचन्द्रेषुनिभे क्रशीयसां स्फुटं पलाशेऽध्वजुषां पलाऽशनात्।**
**स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम्॥**[14]

वस्तुतस्तु पलाशपुष्पस्य सौन्दर्यं दृष्ट्वा विरहिमनो व्यथते। एवं चिन्ताकुला विरहिणः कृशत्वं यान्ति। अत एव कविना कामाऽर्धचन्द्राकारबाणसदृशे विरहिहृदयच्छेदिनि कृशतराणामध्वजुषां मांसभक्षणाद् अन्वर्थके पलाशपुष्पेऽन्वितं वृन्तं कालखण्डजं खण्डम् आलोकतेत्युत्प्रेक्षितम्।

पलाशपुष्पस्य प्रसवबन्धनं तथा च यकृत्खण्डं द्वयमपि वर्णेन कृष्णम्। उभयोर्वणसाम्यादुद्दीपनवर्णनं रमणीयम्।

विप्रयुक्तस्य नलस्य मालूरदर्शनं चित्रयता महाकविना लिखितम्–

**मरुल्ललत्पल्लवकण्डकैः क्षतं समुच्छलच्चन्दनसारसौरभम्।**
**स वारनारीकुचसंचितोपमं ददर्श मालूरफलं पचेलिमम्॥**[15]

अत्र मालूरफलस्य चत्वारि विशेषणानि प्रयुक्तानि। पचेलिममिति विशेषणेन स्वतः पक्वस्य सुवर्णाभस्य फलस्य बोधः। पक्वफलात् सुगन्धः प्रसरति। छेदनानन्तरं फलस्य सुगन्धस्ततोऽप्यधिकं प्रसरति। उपवनस्थमालूरफलान्यपि वायुना दोलायमानानां पल्लवानां कण्टकैः क्षतानि वर्तन्ते। एवं तेषां समुच्छलच्चन्दनसारसौरभत्वम्।

अत्र मालूरफलं वारनारीकुचेनोपमितम्। वारनारीणामङ्गेषु नखक्षतदन्तक्षतादिचिह्नानां वर्णने नानौचित्यम्। मालूरफलेऽपि कण्टकैर्निर्मितानि क्षतचिह्नानि वर्तन्ते। वारनार्यश्चन्दनादिभिः सुसज्जिताः सत्यो जनान् आकर्षयन्ति–

**नित्यमलङ्कारयोगिनी राजमार्गावलोकिनी दृश्यमाना न चातिविवृता तिष्ठेत्।**[16]

एवं समुच्छलच्चन्दनसारसौरभत्वं वारनारीकुचेऽपि वर्तते। सम्प्रयोगवर्णने मालूरफलं कुचस्योपमानं भवति। किन्तु, विप्रयोगोऽङ्गनाङ्गसमागमेच्छायाः प्राबल्यात् प्राकृतिकदृश्येष्वपि सुन्दरीणामङ्गानि दृश्यन्ते। इत्थं प्रकृते मालूरफलस्य वारनारीकुचसंचितोपमत्वादुद्दीपनत्वम्।

उपवनस्थमाम्रं वर्णयता महाकविना लिखितम्–

**रसालसालः समदृश्यताऽमुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः।**
**समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम्॥**[17]

आम्रमञ्जर्याः शोभा सर्वविदिता। दुःखिते मनसि सर्वस्यापि वस्तुनः कष्टकारित्वादत्रापि रसालसालस्य भयकारित्वं बोध्यम्। मादकगन्धवत्त्वात् स्वीयसौन्दर्याच्च रसालसालः काममुद्बोधयति। कामदेवस्य शरेषु रसालोऽप्यन्यतमः–

**अरविन्दमशोकञ्च चूतं च नवमल्लिका।**
**नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥**[18]

प्रकृते प्रेक्षकस्य विरतित्वाद् रसालस्य विप्रलम्भस्योद्दीपनत्वम्।

एवमुपवनवर्णनं विरहिदृष्ट्यैव विहितं कविना।

अत एवोपवनस्य नैसर्गिकं सौन्दर्यं कष्टकारिरूपेण भयकारिरूपेण च चित्रितम्। एवमुद्दीपनस्य स्वाभाविकवर्णनेन विप्रलम्भस्याभिव्यक्ती रमणीया सञ्जाता।

***



## सन्दर्भाः


1. काव्यादर्शः, 1/16-19
2. दशरूपकम्, 4/85
3. काव्यकल्पलतावृत्तिः, 1/5/68
4. नैषधीयचरितम्, 1/74
5. रसार्णवसुधाकरः
6. साहित्यदर्पणः, 3/131
7. नैषधीयचरितम्, 1/81
8. नागरसर्वस्वम्, 2/1-3
9. नैषधीयचरितम्, 1/78
10. नैषधीयचरितम्, 1/82
11. अनङ्गरङ्गः, 1/11
12. रतिरत्नप्रदीपिका, 1/5
13. नैषधीयचरितम्, 1/85
14. तत्रैव, 1/84
15. तत्रैव, 1/94
16. कामसूत्रम्, 6/1/7
17. नैषधीयचरितम्, 1/89
18. अमरकोषः


***

# वैदिकवाङ्मये 'अक्षर'शब्दस्य विविधा अर्थाः

**संगीता आर्या**

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**[1]

सर्गादौ स्वयम्भूः परमात्मा वेदरूपिणीं नित्यदिव्यवाचं मनीषिणां ज्ञानगुहायाम् अस्मत्कल्याणार्थं प्रकाशयामास यामधिकृत्य मनुष्याणां सर्वाः प्रवृत्तयः अद्यावधि प्रवर्तिताः भवन्ति। ऋग्वेदीयमन्त्रोऽपि एतदेव उद्घोषयति–

**तस्मै नूनमभिद्यवे वाचा विरूपनित्यया।**
**वृष्णे चोदस्व सुष्टुतिम्॥**[2]

एषा वेदवाणी विविधविषयाणां निरूपकत्वात् विरूपा इत्युच्यते। एतेषु वेदेषु विविधज्ञानविज्ञानविषयकाणि रत्नानि राजन्ते, परं वेदरूपिणि विपुलरत्नाकरे तत्त्वप्राप्तौ स एव क्षमः भवति यः शब्दानां यथार्थताम् अधिवेत्ति, प्रसङ्गानुगुणं शब्दानाम् उपसर्ग-प्रकृति-प्रत्यय-विग्रह-समासव्युत्पत्ति-निर्वचनादिविषयेषु कृतभूरिपरिश्रमश्च भवति, व्याकरणसिद्धान्तञ्च परिजानाति। तदैव तु महर्षिवेदव्यासः अर्थसहितवेदाध्ययनविषये उवाच–

**यो वेदे च शास्त्रे च ग्रन्थधारणतत्परः।**
**न च ग्रन्थार्थतत्त्वज्ञः तस्य तद्धारणं वृथा॥**
**भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः।**
**यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा॥**[3]

शब्दानां विविधार्थपरिज्ञानाय महर्षियास्कस्य निरुक्तशास्त्रं कुञ्चिकेव कार्यं करोति। यत्र प्रकृति-प्रत्ययविभाजनपुरस्सरं निर्वचनसिद्धान्ताँश्चावलम्ब्य एकैकस्य शब्दस्या-



ध्यात्मिकाधिभौतिकधिदैविकादिषु प्रसङ्गेषु अनेकार्था उद्भवन्ति। प्रस्तुतपत्रेऽस्मिन् तावत् निर्वचनसिद्धान्तान् अवलब्य केवलमक्षरशब्दस्य येऽर्थाः मनीषिभिः मानिताः ते विविच्यमानाः सन्ति।

**ब्रह्म–** उपनिषत्सु अक्षरशब्दस्य विपुलतया प्रयोगः परिदृश्यते, किन्तु प्रायः सर्वत्र एषः अक्षरशब्दः, उपनिषत्सु ब्रह्मणः पर्यायवाचिरूपेणैव दरीदृश्यते। तद्यथा कठोपनिषदि यमाचार्यः नचिकेतसां प्रति उपदिशन्नाह–

**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।**
**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥**
**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥**[4]

यमाचार्यमते एष ओंकाररूपोऽक्षर एव ब्रह्म वर्तते। (सर्वेभ्यो बृहत्त्वाद् ब्रह्म) एष ओंकाराक्षर एव महान् मन्त्रः इति। इदम् ओंकाराक्षररूपब्रह्म ज्ञात्वैव मनुष्याणाम् अध्यात्ममार्गे गतिर्भवति, इमम् अक्षरम् अवलम्ब्य मानवाः ब्रह्मलोके महिमशालिनः भवन्ति। यदा एष अक्षरशब्दः ब्रह्मणः पर्यायवाची भवति तदा इत्थं व्युत्पत्तिर्विधीयते– **यः सर्वमश्नुते न क्षरति विनश्यति तदक्षरम्।** सः स्वयभूः परमात्मा अखिलेऽस्मिन् संसारे व्याप्तः वर्तते, तस्य ब्रह्मणः न कदाचिद् क्षयः भवति न कदाचिदपि च तद् ब्रह्म सर्वथा विनाशत्वमाप्नोति तस्मात् तद् ब्रह्म 'अक्षर'पदवाच्यं वर्तते।

कैवल्योपनिषदि ब्रह्मणः विविधनामोल्लेखप्रकरणे अक्षरशब्दोऽपि पठितो वर्तते।

**स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।**
**स एव विष्णुः स प्राणः स कालोऽग्निश्च चन्द्रमाः॥**[5]

स ब्रह्मा अखिलजगतः निर्माता वर्तते तस्मात् सः ब्रह्मा इत्युच्यते।

(योऽखिलं जगन्निर्माणेन बर्हति बर्द्धयति स ब्रह्मा)।

सर्वत्र व्यापकत्वात् विष्णुः। (वेवेष्टि व्याप्नोति चराचरं जगत् स विष्णुः) दुष्टान् दण्डेन रोदयति तस्मात् रुद्रः। (यो रोदयति अन्यायकारिणो जनान् स रुद्रः)। मङ्गलमयत्वात् सर्वेषां कल्याणकर्तृत्वेन स 'शिव'पदवाच्यः। (शिवु कल्याणे)। सर्वत्र व्यापकत्वात् अविनाशशीलत्वाच्च सः अक्षरः। (यः सर्वमश्नुते न क्षरति न विनश्यतीत्यक्षरम्।)

यः स्वयं प्रकाशस्वरूपः वर्तते सः स्वराट् (राजृ दीप्तौ)। यः प्रलयकाले समेषां कालरूपः अन्यच्च कालस्यापि कालरूपः यः सः परमेश्वरः कालाग्निः इत्युच्यते।

(योऽग्निरिव कालः कालयिता प्रलयकर्ता स कालाग्निरीश्वरः) इत्यादयः समेऽपि शब्दाः परब्रह्मणः गुणानुरूपाः तस्य पर्यायवाचिरूपेण प्रयुक्ताः सन्ति। अत्र अक्षरशब्दोऽपि ब्रह्मणः पर्यायवाचिरूपेण प्रयुक्तः वर्तते।

**ओंकारः–** अक्षरशब्दः ब्रह्मपदवाच्यस्तु वर्तते एव परं सहैव ब्रह्मणः प्रमुखनाम्नः ओंकारस्याऽपि वाचको वर्तते, यतो हि निरुक्तकारस्य वचनं वर्तते–

**अक्षो यानस्य, अञ्जनात्। तत्प्रकृतीतरद् वर्त्तनसामान्यात्।**[6] इति भाषायाम्।

अर्थात् आवर्तनसामान्याद् अक्ष (धुरा) स्वरूपकः एषोऽपरः ''अक्षरः'' वर्तते। अत्र ऋषयः महर्षयश्च मन्यन्ते यत् सम्पूर्णवेदवाण्याः मुख्यतात्पर्यम् ओंकार एव पर्यवस्यति, अत एष ओंकारः सकलवेदवाण्या अक्ष(धुरा)रूपः वर्तते। यथा यानस्य 'धुरा' अक्षपदवाच्यः भवति यतो हि तस्योपरि सम्पूर्णयानगतिरवलम्बिता भवति अर्थात् यथा अक्षम् अवलम्ब्य सम्पूर्णयानचक्राणि परिभ्रमन्ति तथैव ओंकाररूपाक्षं (अक्षरं) परितः समस्तवेदमन्त्राः परिभ्रमन्ति। तस्मादसौ ओंकारः अक्षरः इति। तद्यथा कठोपनिषदः वचनं वर्तते–

**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।**[7]

माण्डूक्योपनिषदि-

**ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्**
**भविष्यदिति सर्वमोंकार एव। यच्चान्यत्त्रिकालातीतं तदप्योंकार एव।।**[8]

छान्दोग्योपनिषदि-**ओमित्येतदक्षमुद्गीधमुपासीत।**[9]

अक्ष एव अक्षरम्। अत्र अक्षशब्दात् स्वार्थे रन् प्रत्ययो भवति।

**वाक्–** निघण्टुकोषे सप्तपञ्चाशद्वाङ्नामसु ''अक्षरम्'' इति पदमपि आम्नातं वर्तते। आचार्यदेवराजयज्वा ''निघण्टुनिर्वचनम्'' इति ग्रन्थे वाङ्वाचिनः अक्षरपदस्य निर्वचनं कुर्वन्नाह-अक्षरम् (वाक्)। ''अश्नुते श्रोतुं स्वाभिधेयं व्याप्नोति वा।'' एषा वाक् श्रवणेन्द्रियं स्वाभिधेयं पदार्थं वा आप्नोति तस्मात् एषा वाक् अक्षरमित्यभिधीयते। पक्षेऽस्मिन् 'अश्' (अशूङ् व्याप्तौ) धातोः सरन् प्रत्ययो भूत्वा अक्षरपदम् उपपन्नम्। अत्रैव कानिचन अन्यान्यपि निर्वचनानि निर्दिष्टानि सन्ति–''व्याप्नोति जगत् इत्यक्षरम्।'' एषा वाक् अखिलेऽस्मिन् जगति व्याप्नोति। ''अश्यते भुज्यते वा प्राणिभिः।'' एषा वाक् प्राणिभिः प्रयुज्यमाना सती तैः उपभुज्यते। अनक्ति सेचयति भूमिं वा।'' उपदेशकाले एषा वाक् गुरुणा साधनवत् प्रयुज्यते तदा एषा वाक् विद्यार्थिनां चित्तभूमिं ज्ञानेन



सेचयति, तस्मादपि एषा वाक् अक्षरपदवाच्या वर्तते। अत्र ''अञ्जू सेचने'' धातुः। न क्षरति क्षीयते कदाचिदपीति वा अक्षरम्। एषा वाक् न कदाचिदपि क्षयत्वमाप्नोति तस्मात् वाक्पदवाच्या। जैमिनीयोपनिषद् अक्षरपदस्य निर्वचनम् इत्थं ब्रूते–

**कतमत्तदक्षरमिति। यत् क्षरन्न क्षीयते इति।** इन्द्र इति।

एषा वाक् जनैः प्रयुज्यमानाऽनि यथा क्षरन्त्यपि न सर्वथा क्षरति तस्मात् एषा वाक् अक्षरपदवाच्या। एषा क्षरन्त्यपि न कदाचित् सर्वथा क्षरिता भवति। अत्र 'क्षर' (गतौ) अथवा 'क्षि' (क्षये) इत्येताभ्यां धातुभ्यां सिद्धिर्भविष्यति।

**वर्णाः–** महाभाष्यकारः महर्षिः पतञ्जलिः 'ञभञ्' इति सूत्रे अवोचत्– **अथ किमिदमक्षरमिति?** तत्र उत्तरमाह–

**अक्षरं न क्षरं विद्याद् अश्नोतेर्वा सरोऽक्षरम्।**
**वर्णं वाऽऽहुः पूर्वसूत्रे किमर्थमुपदिश्यते।।**

**अक्षरं न क्षरं विद्यात्–न क्षीयते, न क्षरतीति वाऽक्षरम्।**

अत्राह महाभाष्यटीकाकारः कैयटः यत् क्रियाशब्दोऽयं नित्यस्यार्थस्य वाचक इति दर्शयति। तत्र क्षियः क्षरतेर्वा विनाशार्थस्य नञ् पूर्वस्य रूपम् इति।

**अश्नोतेर्वा सरोऽक्षरम्–** अत्राह अश्नोतेर्वा पुनरयमौणादिकः सरन् प्रत्ययः। अश्नुते इत्यक्षरम्। अत्र अशूङ् व्याप्तौ इत्यनेन औणादिकः सरन्– प्रत्ययः भवति, तदा विग्रहः जायते– तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं वर्णं पदं वाक्यं वा।

**वर्णं वाऽऽहुः पूर्वसूत्रे–** अथवा पूर्वसूत्रे = पूर्वाचार्यैः अक्षरस्य वर्ण इत्येषा संज्ञा विहिता आसीत्। ततः अन्तिमचरणे पप्रच्छ 'किमर्थमुपदिश्यते। अथ किमर्थमक्षराणाम् उपदेशः आवश्यकः' इति। तदा अतीव रोचकं समाधानं ददौ महर्षिपतञ्जलिः–

**वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते।**
**तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते।।**

**सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुष्पफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते।**[10]

इत्थं महर्षिः पतञ्जलिः महाभाष्ये अक्षरसमाम्नायं प्रशंसयामास। महर्षिः यास्काचार्यः निरुक्ते अक्षरपदस्य निर्वचनमीदृक् कुरुते–अक्षरं न क्षरति, न क्षीयते वा। (निरु.13/10)

यः कदाचिदपि न क्षीयते तदक्षरं वर्णः।

न + क्षि = अक्षर। ऐतरेयब्राह्मणेऽपि एतदेव निर्वचनं लभ्यते–

**यद्वा नञ् पूर्वात् क्षरतेः। न क्षरति सर्वदा सर्वैः प्रयुज्यमानापि न क्षीयत इत्यर्थः। वाग्वै समुद्रो न वै वाक् क्षीयते।**[11]

एतस्मात् कारणात् एतेषां वर्णानाम् ''अक्षर'' इत्येषा संज्ञा अन्वर्था एव। तदैव तु एतेषाम् अक्षराणां नित्यत्वविषये आचार्यभर्तृहरिः वाक्यपदीये–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[12]

**प्राणः–** अक्षरपदस्य विवेचनं कुर्वन् ऐतरेयारण्यकस्य ऋषिर्गदति स (प्राणः) यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति, न चैनमतिक्षरन्ति तस्मादक्षरम्।[13]

एषः प्राणः सर्वेभ्यः भूतेभ्यः क्षरति (प्राणाः निस्सरन्ति), परं भूताः प्राणिनः इमं प्राणं न क्षारयन्ति त्यक्तुं नेच्छन्ति (मृत्युं नेच्छन्ति), अतः एषः प्राणः अक्षर-पदवाच्यः भवति। अत्र न+क्षर=अक्षर एवं सिद्धिर्भविष्यति।

**उदकम्–** निघण्टुकोषे उदकवाचिपदसमूहे ''अक्षरम्'' इत्यपि पदं परिगणितं वर्तते।[14] अत्र आचार्यः देवराजयज्वा उदकवाचिनः अक्षरपदस्य निर्वचनं कुर्वन्नाह– अश्नुते व्याप्नोति जगत्। (निघण्टुवृत्तिः 1/12/32)। एतद् उदकं जगत्सु पदार्थेषु व्याप्नोति तस्माद् अक्षरमित्युच्यते। अस्मिन् पक्षे अश् (अशुङ् व्याप्तौ) धातोः ''सरन्'' प्रत्ययं कृत्वा अक्षरशब्दः साधनीयः। उणादिकोशोऽपि इत्थमेव अक्षरपदं निर्मापयति। (उणा. 3/70)

**यद्वा अश्यते भुज्यते वा प्राणिभिः।** निघ. वृत्ति. 1/12/32

**उदकमिदं प्राणिभिः उपभुज्यते अतः अक्षरमित्युच्यते।**

**अनक्ति सेचयति भूमिं वा।** निघ. वृ. 1/12/32

एतद् उदकं भूमिं सेचयति तस्माद् अक्षरपदेनाभिहितं भवति। अञ्ज् + सरन् = अक्षरं न क्षरति, क्षीयते कदाचिदपि वा। (निघ. वृत्ति. 1/12/32)

उदकमिदं कदाचिदपि सर्वथा न क्षीयते। समुद्रेषु उदकस्य अपरिमितः संचयो वर्तते। पृथिव्याः भागत्रयं जलेनाप्लावितमिति जानीमो वयम्। न + क्षरम् = अक्षरं वेदेष्वपि क्षर् धातोः एव अक्षरपदस्य मूलसिद्धिर्विधीयते–



**ततः क्षरत्यक्षरं तद्विश्वमुपजीवति।**[15]

**सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्याः अधि विक्षरन्ति॥**[16]

वैदिकपदानुक्रमकोषे ''अक्षरपदस्य सिद्धिः 'अश्' अथ च ''अक्ष (व्याप्तौ) धातुभ्यां भवति (वै.पद.कोष, पृ.14) ऋग्वेद–वैयाकरणपदसूच्यां तथा च मोनियरविलियम्स महोदयः अक्षरपदस्य मूलं ''अक्ष व्याप्तौ'' धातुं मनुते। (ऋ.वे.पद, पृ.4) संस्कृत इंग्लिश डिक्शनरी ग्रन्थस्य रचनाकारः मोनियर विलियम्स महोदयानुसारं अक्षरपदस्यार्थः अविनाशी, अपरिवर्तनीय इति वर्तते। (संस्कृत इंग्लिश डिक्शनरी, पृ.3)। परमत्र डॉ.सिद्धेश्वर वर्मणः मतं यत् अक्षरस्य अविनाशिस्वरूपस्य व्याख्यानं दार्शनिकं वर्तते यत् जनसामान्यः साधुत्वेन नावगच्छति। अतः वाण्याः अक्षः (धुरा) अर्थात् मुख्याधारभूतत्वात् एतत्। अक्षरमित्यभिधीयते। उदकं वाक् उभे एव वाण्याः मुख्याधारे स्तः। अतः उभे अक्षरपदवाच्ये स्तः। ऋग्वेदस्य मन्त्रेऽस्मिन् अक्षरपदम् उदकस्य वाचकं वर्तते–

**गौरीर्मिमाय सलिलानि तक्षव्येकपदी द्विपदी सा चतुष्पदी।**
**अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥**[17]

**समुद्रः–** सम्प्रत्येव अक्षरपदस्य उदकवाचकत्वं साधितम्, तस्यैवोदकस्य प्रवाहः समुद्रे दरीदृश्यते, अन्यच्च उपर्युक्तस्य उदकस्य अविनाशित्व–व्यापकत्वादयः समेऽपि उदकस्थगुणाः प्रभूतमात्रया समुद्रे भवन्ति तस्मात् समुद्रोऽपि अक्षरपदवाच्यो भवति। तद्यथा ऐतरेयब्राह्मणे– तथा यद्वा नञ्पूर्वात् क्षरतेः। न क्षरति सर्वदा सर्वैः प्रयुज्यमानोपि न क्षीयत इत्यर्थः। वाग्वै समुद्रो न वै वाक् क्षीयते।[18]

अत्र अक्षरपदवाचिनी वाक् समुद्रेण सह उपमिता वर्तते। एतत्तु सर्वविदितमेव यत् यदा उपमाने उपमेये च समानधर्माः दृश्यन्ते तदैव उपमायाः साफल्यं भवति। अक्षवाचिनि समुद्रे च समानधर्माः सन्ति, तेन समुद्रोऽपि अक्षरपदवाच्यः वर्तते। तस्याः समुद्राः अधिविक्षरन्ति ... (ऋ.1/164/42) सहस्राक्षदा भुवनस्य ... (अथर्व. 13/1/42) इत्यादिषु वेदमन्त्रेषु अक्षरपदेन समुद्रः अभिहितो वर्तते।

**वेदवाणी–** अक्षरपदस्य निर्वचनप्रसङ्गे एकत्र महर्षियास्कः लिलेख- **वाचोऽक्ष इति वा।** (निरु. 13/10) अत्र हिन्दीटीकाकारः आचार्य चन्द्रमणि महोदयः प्रतिपादयति यत् यथा– अक्षं (धुरा) परितः सम्पूर्णरथचक्रं परिभ्रमति तथैव सृष्टेरादौ परमपित्रा परमात्मना प्रदत्तां इमां वेदवाणीं परितः (तमेवाश्रिव्य) अस्मदीया सांसारिकी वाग्व्यवस्था अद्यावधि परिभ्रमति। अतः एषा वेदवाणी अक्षरपदवाच्या भवति। तद्यथा–उक्तमपि

महर्षि मनुना संसारस्य समस्ता वाग्व्यवस्था वेदादेव निर्गता इति–

**सर्वेषां तु नामानि कर्माणि च पृथक् पृथक्।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥**[19]

अथवा अक्षरणशीला एषा वेदवाणी प्रतिसर्गादौ परमात्मना अस्मत्कल्याणार्थं प्रदीयते, तद्यथा ऋग्वेदे–

**यथेमां वाचं कल्याणीमावदानी जनेभ्यः।**[20]

**आदित्यः–** अक्षरपदस्य निर्वचनप्रसङ्गे महर्षिः यास्कः मन्त्रमिमं प्रस्तौति–

**ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः।**
**यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इव समासते॥**[21]

अग्रे अत्र निरुक्तकारः वक्ति– कतमत्तदेतद् अक्षरम्? ओमित्येषा वागिति शाकपूणिः। ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेषु।[22]

अत्र निरुक्तकारः मन्त्र उपस्थितस्य अक्षरपदस्याध्यात्मिकाधिदैविकाधिभौतिकवादि-प्रसङ्गेषु पृथक् पृथक् अर्थान् उद्भावयति। तद्यथा आधिभौतिकपक्षे मन्त्रागतम् अक्षरपदं ब्रह्मणः वाचकम् इति प्रतिपादयति। परं तत्रैव अधिदैवतपक्षे असौ अक्षरशब्दः मन्त्रे आदित्यार्थं बोधयति। तद्यथा उक्तमाचार्यैः– आदित्य इति पुत्रः शाकपूणेः। एषर्ग् भवति, यदेनमर्चन्ति। तस्य यदन्यन्मात्रेभ्यस्तदक्षरं भवति। रश्मयोऽत्र देवा उच्यन्ते, स एतस्मिन्नधिनिषण्णाः इत्यधिदैवतम्।[23]

**जीवात्मा–** अध्यात्मपक्षे मन्त्रागतम् अक्षरपदं शरीरस्थस्य अविनाशशीलस्य जीवात्मनः वाचकं वर्तते। एष आत्मा शरीरस्य नाशे सत्यपि अविनाशित्वेनैव तिष्ठति, क्षयत्वं नाप्नोति तस्माद् क्षयरहितत्वात् अक्षरपदवाच्य एषः जीवात्मा। तद्यथा उक्तमपि भगवता श्रीकृष्णेन गीतायाम्–

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥**[24]

**अग्निः–** सहस्रपाथा अक्षरा समेति। (ऋ.7/1/14) ऋग्वेदीये मन्त्रेऽस्मिन् अक्षरेति पद्य अग्न्यर्थं प्रयुक्तं वर्तते। अस्य मन्त्रस्य द्रष्टा ऋषिः वसिष्ठः, तस्य मतं यत् एषः अग्निः सहस्रस्थानेषु निवसति। सः सहस्रस्थानीयः अग्निः क्षयरहितस्तुत्या आहूयते तस्मात् एषः अग्निः 'अक्षरा' इति पदवाच्यः वर्तते।

**इन्द्रः–** जैमिनीयोपनिषद्ब्राह्मणे इन्द्रदेवतार्थम् अक्षरपदं प्रयुक्तं वर्तते–



अथ किम् उपास्से इति। अक्षरमिति। कतमत् तदक्षरमिति। यत् क्षरन्न क्षीयते इति। कतमत् तत् क्षरन्न क्षीयते इति। इन्द्र इति। कतमः स इन्द्र इति। योऽक्षन् रमत इति। कतमः स योऽक्षन् रमत इति। इयं देवतेति होवाच। जै.उ.ब्रा. 1/14/2/8-9

**मोक्षः–** अशेः सरन् (उणा.3।70) इत्यस्मिनौणादिके सूत्रे टीकायां महर्षिदयानन्दः अक्षरपदस्य व्युत्पत्तिं कुर्वन्नाह–

**अश्नुते व्याप्नोतीति अक्षरं ब्रह्म वर्णो मोक्षम् उदकं वा।** उणा. 3/70

अन्यैरपि आचार्यैः अक्षरपदेन मोक्षार्थः अभिधेयः इति प्रतिपाद्यते–

**अक्षरं वर्णः मोक्षपदं, आकाशं च।** उणा.ग.वि. 439

अश्नुते अश्नाति वा अक्षरम्, वर्णः मोक्षपरं च। दश.उ.वृ. 8/50 मा.देव

अश्नुते अश्नाव्यश्यते वा अक्षरम्, वर्णः, मोक्षपदं च। दश.उ.वृ.8/55

अशूङ् व्याप्तौ संघाते च + सरन् प्रत्ययः (अशेः सरन् उ.3/70)

क्षर सञ्चलेन + अच् प्रत्ययः (नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः अष्टा.3/1/134)

विविधग्रन्थेषु सम्प्राप्तानि अक्षरपदस्य निर्वचनानि व्युत्पत्तयश्च सौकर्यार्थम् अत्र संगृह्यन्ते।

वेद–उपनिषद्–ब्राह्मणव्याकरणादिषु च–

1. तस्याः समुद्रा अधिविक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।
   ततः क्षरत्यक्षरं तद्विश्वमुपजीवति। (ऋ.1/164/42)
2. सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्या अधिविक्षरन्ति। (अथर्व. 13/1/42)
3. तदक्षरदेव। यदक्षरदेव तस्मादक्षरम्। यद्वेव क्षरन्नाक्षीयत तस्मादक्षयम्।
   अक्षयं ह वै नामैतत्। तदक्षरमिति परोक्षमाचक्षते।
   (जै.उपनिषद्ब्राह्मणम् 1/7/2/1-2)
4. अथ किम् उपास्से इति। अक्षरमिति। कतमत् तदक्षरमिति। यत् क्षरन्नाक्षीयतेति कतमत् तत् क्षरन्नाक्षीयतेति। इन्द्र इति। कतमः स इन्द्र इति। योऽक्षन् रमत इति। कमतः स योऽक्षन् रमत इति। इयं देवतेति होवाच।
   (जैमिनीयोपनिषद्ब्राह्मणम् 1/14/2/8-9)
5. यदक्षरं न क्षरते कथञ्चित्। (अमृतनादोपनिषद्, 24)

6. व्यक्तमेवाक्षरं तस्मादक्षरम्। (गोपालोत्तरतापिन्युपनिषद्, 9)

7. दशधा वा एतद् अतिविध्येमान् क्षरति शतधेमान् सहस्रधेमान् तस्मात् एतत् एवाक्षरं गेयम्। (जैमिनीयब्राह्मण 2/10)

8. अक्षरन्न क्षरति। (जैमिनीयब्राह्मण 2/258)

9. अक्षरं न क्षरति न क्षीयते अक्षयं भवति। (निरुक्तः 13/10)

10. अक्षरं न क्षरं विद्यात्, न क्षीयते न क्षरतीति वाऽक्षरम्।

अश्नोतेर्वा सरोऽक्षरम्। अश्नुत इत्यक्षरम्। (पातञ्जलमहाभाष्यम्, 'झभञ्' सूत्रे)

**उणादिवृत्तिषु–**

1. अश्नुते व्याप्नोतीति अक्षरं ब्रह्म वर्णो मोक्षमुदकं वा।

(उणादिकोषः 3/70 दयानन्दकृतः)

2. अश्नुत इति अक्षरं वर्णम्। न क्षरतीति अक्षरम् इति केचित्।

(उणादिवृत्तिः 3/67 श्वेतकावासीकृत)

3. अश्नुते व्याप्नोति पदानि अक्षरम्।

(उणा.सू. 3/70 नारायणभट्टकृतं प्रक्रियासर्वस्वम्)

4. अक्षरः वर्णविशेषः। (दण्डनाथनारायणविरचिता उणादिसूत्रवृत्तिः 2/3/68)

5. अश्नातीति अक्षरं वर्णः। (उणादिवृत्तिः 4/33 दुर्गसिंहकृता)

6. अक्षरं वर्णः, मोक्षपदं, आकाशं च। (उणादिगणविवृत्तिः हेमचन्द्रकृता 439)

7. अक्षरं वर्णनिर्माणं वर्णमप्यक्षरं विदुः।
अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरमिति स्मृतिः।

(उणा.सूत्रम् 3/70 उज्ज्वलदत्तकृतम्)

8. अश्नुते अश्नाति वा अक्षरं वर्णः मोक्षपदं च। (दशपादी उणादिवृत्तिः 8/50 माणिक्यदेवकृता)

9. अश्नुते अश्नात्यश्यते वा अक्षरं वर्णः मोक्षपदं च।

(दशपादी उणादिवृत्तिः 8/55 अज्ञातनामा)

इत्थं प्रतिपादितमेतत् यद् अक्षरपदस्य प्रकृति-प्रत्यय-विग्रह-समास-व्युत्पत्तिनिर्वचनादि-भिन्नत्वात् प्रसङ्गानुसारम् अक्षरस्यास्य भिन्नभिन्नार्था उद्भवन्ति। तद्यथा उक्तमपि महर्षियास्केन-

**विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभक्तीः सन्नमयेत् इति।।** निरु. 2/1

***



## सन्दर्भाः

1. महाभारतम् 12/224
2. ऋ. 8/75/6
3. म.भा.12/293/24-25
4. मुण्डकोप. 16-17
5. कैवल्योप. 8
6. निरुक्तम् 13/10
7. कठो. 2/15
8. मुण्डक. 1/1
9. छान्दोग्योप. 1/4/1
10. महाभाष्यम्, झभञ्
11. ऐ. ब्रा. 5/3/9
12. वाक्यपदीयम् 1/1
13. ऐ.आ. 2/2/2
14. निघ.1/12/32
15. ऋ. 1/164/42
16. अथर्व. 13/1/42
17. ऋ.1/164/41
18. ऐ.ब्रा. 5/3/9
19. मनु.1/21
20. यजुर्वेदः 26/2
21. ऋ.1/164/39
22. निरु. 13/10
23. निरु. 13/10
24. गीता 2/20

***

# विवाहकालविमर्शः

**डॉ. गणेशत्रिपाठी**

## प्राक्परिकल्पना

भारतीयपरम्परायां वर्णाश्रमव्यवस्था मुख्यतया विराजते। ब्रह्मचर्याश्रममवाप्य ब्रह्मचारी समावर्तनसंस्कारेण दीक्षितो भूत्वा गृहस्थाश्रमप्रवेशार्थं गुरोराज्ञया स्वकुलाचारां वर्णोपेतां कन्यां चित्वा वैवाहिकबन्धने बन्ध्नाति। वर्णाश्रमव्यवस्थायाः ऋगादिचतुर्वेदा एव सर्वप्रमाणानामाकाररूपाः। वैदिककालादेव विवाहसंस्कारः पवित्रसंस्काररूपेण आमन्यते स्म। ऋग्वेदीयविवाहसूक्तेन तथा चाथर्ववेदेनाभिज्ञायते यत् वैदिकेकाले विवाहप्रथा पूर्णविकसिताऽसीत्। तत्समये च वैवाहिकजीवनं सत्यस्य कर्तव्यस्य च प्रतीकं मन्यते स्म। ऋग्वेदीये विवाहसूक्ते अनेकेषां मन्त्राणामुल्लेखेन पूर्णतया ज्ञायते यत् विवाहसंस्कारस्य स्थानं लोके भद्रात्मकमासीत्। तथा चायं मन्त्रः–

**गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।**
**भगो अर्यमा सविता पुरन्धिर्मह्यं त्वा दुर्गाहं पत्याय देवाः॥**[1]

विवाहः कदा भवेदिति वेदादिषु प्रमाणं प्रभूतमुपलभ्यते तथा च तत्रापि बहुविधविवाहार्थं विविधकालाः निर्धार्यन्ते। तेष्वेव कालेषु तादृशः विवाहसंस्कारः कर्तव्य इति शास्त्रनिदर्शनम्। पूर्वकालादद्यावधि यावत् विवाहकालेषु महत्परिवर्तनं संजातमस्ति। पूर्वं वैदिकी व्यवस्था भिन्ना आसीत् ततश्च मध्यकालिकी व्यवस्थापि भिन्ना जाता। साम्प्रतमपि सैव भिन्ना व्यवस्था। अत्र तेषामेव निदर्शनं विविधशास्त्रानुरोधेन क्रियते।

## पूर्ववर्तिविवाहकालः

कन्याया विवाहस्य कालसन्दर्भे आवैदिककालात् पौराणिककालं यावद् विवेचन-स्यात्यावश्यकताऽनुभूयते। एतद् ज्ञानं सुतरामभिधेयमस्ति यत् सर्वकालेषु भिन्नभिन्नप्रान्तेषु



भिन्नभिन्नजातिषु विवाहावस्था पृथक् पृथक् स्वीक्रियते। वेदाध्ययनादनन्तरं पुरुषाणां विवाहावधिः निश्चितः नास्ति। केवलं स्त्रीणां कृते एषा व्यवस्था प्रतिपादिता वर्तते। वैदिकसमये बालविवाहस्य प्रथा नासीत्। ऋग्वेदस्य तथा चाथर्ववेदस्य वैवाहिकमन्त्रैर्ज्ञायते यद् वरवध्वौ इयत्यौ प्रौढे आस्तां यत् तौ कस्याऽपि समीपे नैजं प्रस्तावं धृतवत्यौ आस्ताम्। कन्यायाः पूर्णशारीरिकविकासः पितृगृह एवासीत्। सूर्यस्य पुत्र्याः सूर्यायाः विवाहः सोमेन सह तत्समये बभूव यावत्समये सा युवतिरासीत्। वैदिककालिकी स्त्री घोषाऽपि स्वविवाहं तस्मिन् समये कृतवती यदा तस्या यौवनं प्रायो व्यत्येति स्म।

**ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।**[2]

गृह्यसूत्रानुसारमपि विवाहस्य व्यवस्था कन्यायाः रजोदर्शनतः पश्चादेव समभवत्। बौधायनगृह्यसूत्रानुसारं वधूजनस्य रजस्वलासम्भावनायां विचारः क्रियते। रामायण-महाभारतसमयेऽपि विवाहसमये कन्याः प्रौढतां गता आसन्। सीता अनसूयां प्रति प्रोक्तवती यद् मम पिता मां विवाहयोग्यां मत्वा एवं चिन्तितवान् यथा निर्धनमनुष्यः स्वकीयवित्तनाशादिति।

**पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता।**
**चिन्तामभ्यगमद् दीनो वित्तनाशदिवाधनः॥**[3]

मनुनोक्तं यत् ऋतुमत्यां सत्यां कुमारीणां कृते वर्षत्रयं यावद् योग्यवरस्य प्रतीक्षा विधातव्या। इतः पश्चाद् तस्याः सवर्णेन पत्या सह विवाहो विधेयः।

**त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमी सती।**
**ऊर्ध्वं तु कालादेतस्माद् विन्देत सदृशं पतिम्॥**[4]

## परवर्तिविवाहकालः

अतः वैदिकमहाभारतस्मृतिकालेषु विवाहः युवावस्थायां भवति स्म, किन्तु परवर्त्तिभिः स्मृतिकारैर्बालविवाहोपरि अधिकाधिकं बलं प्रदत्तम्। पश्चात्तने स्मृतिसमये धर्मशास्त्रकाले च प्रौढविवाहस्य दोषं प्रदर्शयद्भिः काठिन्यं चावलोकयद्भिर्बालविवाह एव सर्वोत्तमः स्वीचक्रे। स्मृतिकारैर्विवाहयोग्यकन्याः पञ्चसु श्रेणीषु विभज्यन्ते। प्रथमा नग्निका, द्वितीया गौरी तथा अष्टवार्षिका, तृतीया रोहिणी तथा नववार्षिका, चतुर्थी कन्या तथा दशवार्षिका, पञ्चमी रजस्वला तथा दशवर्षतोऽधिकायुष्मती। गोभिलः तथा च मानवगृह्यसूत्रकारः नग्निकां विवाहाय सर्वोत्तमां मन्यते। वसिष्ठानुसारम् ऋतुकालभयेन पित्रा नग्निकावस्थायामेव कन्याविवाहः कर्तव्यः। यतो हि ऋतुमत्यां कन्यायां गृहे स्थितायां पिता दोषभाग् भवति।

मनोरनुसारं यदि उत्कृष्टमभिरूपं च वरं प्राप्नुयात् तर्हि पिता स्वकन्याया विवाहं कुर्यात् तस्यां विवाहयोग्यायां सत्यामपि। महाभारते प्राप्तैकव्याख्यानुसारं जन्मत एव सदृशेन वरेण साकं कन्याविवाहः कर्तव्यः। ब्रह्मपुराणानुसारमपि शैशवावस्थायामेव कन्याविवाहो विधातव्यः। यावत् सा स्त्री सुलभलज्जया परिचिता न भवेत् तथा च यावत् सा मृत्तिकया क्रीडति रमते च तदैव तस्या विवाहः विधेयः अन्यथा तस्या मातापितरौ अधोगतिं प्राप्नुतः। ऋक्संहितायां वसिष्ठस्मृतौ अग्निपुराणे इत्यादिग्रन्थेषु च प्राप्यते यत् अग्निसोम-गन्धर्वप्राकृतिकदेवताः यदा कदाचन कन्यायाः शारीरिकविकासे सहायका मन्यन्ते स्म, ता एव देवता अग्रे गत्वा तस्या उपभोक्तृत्वेन मन्येरन्।

**सोमस्य जाया प्रथमं गन्धर्वस्ते परः पतिः।**
**तृतीयोऽग्निस्ते पतिस्तुरीयस्ते मनुष्यजः॥**[5]

एवमेव धर्मशास्त्रग्रन्थेषु बालिकानां विवाहावस्थाया उपरि अनेकानेकप्रसङ्गो विद्यते। 30 वर्षदेशीयः पुरुषः 12 वर्षदेशीयया कन्यया सह, 24 वर्षदेशीयः पुरुषः 8 वर्षदेशीयया कन्यया सह विवाहं कर्तुं शक्नोति मन्वादिमतानुसारम्। विष्णुपुराणेऽपि एवमेव निगदितमस्ति यत् कन्यावरयोर्विवाहावस्थाया अनुपातः 1/3 स्थापितः स्यादिति। एतेषां सर्वेषामालोचनेन प्रतीयते यत् पुराणकाले सूत्रकालापेक्षया बालविवाहं प्रति अधिक आग्रहो नासीत्।

आवैदिकयुगात् वर्तमानयुगं यावत् प्रौढविवाहपद्धतेः प्रचलनं सर्वत्र परिदृश्यते। अत एवास्मिन् समये कन्यानां पितृणामपि विशेषाग्रहो नासीत्। तदा तु पिता कन्यायाः कृते स्वयंवरं रचयामास, अथवाऽस्मिन् कर्मणि ताः स्वानुकूलवरं योग्यवरं स्वेच्छया अन्विष्येयुः। दिङ्मात्रं यथा कृष्णस्य रुक्मिण्या सह विवाहः[6], अनिरुद्धस्य उषया सह विवाहः[7], काशीनरेशस्य सुबाहोः पुत्री शशिकला अयोध्यायाः भूपतेः ध्रुवसन्धेः पुत्रं सुदर्शनं स्वेच्छया वृतवती[8], मन्दोदर्या अपि स्वेच्छया रावणेन सह बभूव। सीताया विवाहोऽपि पूर्णयौवनप्राप्त्यनन्तरमेव समजनीति[9], अर्जुनस्य सुभद्रया सह विवाहः[10], दमयन्तीविवाहोऽपि स्वयंवरं रचयित्वा यौवनप्राप्तावेव सञ्जातः। सावित्री सत्यवन्तं स्वीकृतवती[11] इति। एभिः पौराणिकप्रमाणैरुपयुक्तवार्तायाः संपुष्टिर्जायते यदस्मिन् समये कन्यानिमित्तं योग्यवरविषये अधिकाधिकं बलं प्रदत्तमस्तीति। अनेनेदं सिद्ध्यति यत् प्राचीनकाले कन्यकानां विवाहः पूर्णप्रौढावस्थायां सत्यां भवति। सुश्रुताचार्यमते तु कन्यकानां विवाहः षोडशवर्षादूर्ध्वं तथा पुरुषाणां विवाहः पञ्चविंशतेरुर्ध्वं स्याद् येन सन्ततिः प्रबला भवति। यथा हि–



**ऊनषोडशवर्षायामप्राप्तपञ्चविंशतिम्।**
**यदा धत्ते पुमान् गर्भे कुक्षिस्थः स विपद्यते॥**[12]

***

## सन्दर्भाः

1. मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु।
   मम वाचमेकमना जुषष्व प्रजापतिष्ट्वा नियनक्तु मह्यम्।। ऋग्वेद.,10/85/35-36
2. अथर्ववेदः, 11.5.18
3. रामायणम्, 1.119.34
4. मनुस्मृतिः, 9.10
5. संस्कारप्रकाशः
6. विष्णुपुराणम्, पञ्चमांशः
7. ब्रह्मवैवर्तपुराणम्
8. देवीभागवतम् पूर्वार्धः तृतीयस्कन्धः 19.9.13
9. रामायणम्, 1.119.34
10. श्रीमद्भागवतपुराणम्
11. देवीभागवतम्, अष्टमस्कन्धे 27.8
12. सुश्रुतसंहिता

***

# अक्षराधिकरणविमर्शः

आचार्य श्रीपाद सुब्रह्मण्यः

श्रीमच्छारीरकमीमांसायामध्यायचतुष्टयात्मिकायां प्रथमाध्याये तृतीयपादे तृतीयमधिकरणमक्षराधिकरणम्। ''अक्षरमम्बरान्तधृतेः'', ''सा च प्रशासनात्'', ''अन्यभावव्यावृत्तेश्च'' इति सूत्रत्रयात्मकमधिकरणमिदम्। तत्र प्रथमोऽध्यायः समन्वयाध्यायः। द्वितीयः अविरोधाध्यायः। तृतीयः साधनाध्यायः। चतुर्थः फलाध्यायः। तत्रापि प्रथमाध्यायस्य प्रथमपादे स्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानामद्वितीये ब्रह्मणि समन्वयः क्रियते। द्वितीयपादे तृतीयपादे च अस्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानां ब्रह्मणि समन्वयः क्रियते। तत्रापि प्रायशः द्वितीयपादे उपास्यब्रह्मणि तृतीयपादे ज्ञेयब्रह्मणि समन्वयः क्रियते। चतुर्थपादे अजाऽव्यक्तादिपदानामुपनिषद्वाक्यस्थानामर्थनिर्णयः क्रियते।

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥**

इति सर्वमप्यधिकरणं पञ्चाङ्गं भवति। विशयो नाम संशयः। विषयः, संशयः पूर्वपक्षः, सिद्धान्तः, सङ्गतिश्चेति पञ्च अङ्गानि सर्वस्याप्यधिकरणस्य भवन्ति।

''कस्मिन्नु खलु आकाशः ओतश्च प्रोतश्चेति'', **''स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनणु''**[1] इत्यादि बृहदारण्यकवाक्यम् अस्याधिकरणस्य विषयः। अस्योपनिषद्वाक्यस्यायमर्थः। आकाशः कस्मिन् ओतश्च प्रोतश्चेति अर्थात् आकाशस्य आश्रयः कः इति गार्गी पृष्टवती। तदानीं याज्ञवलक्यमुनिः एवमुवाच। तत् अव्याकृतस्याधिकरणम्, एतत् अक्षरम् अस्थूलादिरूपमित्यर्थः। ओङ्कारादिवर्णे, परमेश्वरे च अक्षरशब्दः प्रयोज्यते। अतः प्रकृतोपनिषद्वाक्ये अक्षरशब्दवाच्यः वर्णो वा उत परमेश्वर इति संशयः।

इदानीं सङ्गतयः प्रदर्श्यन्ते। प्रथमतः अधिकरणसङ्गतिः प्रदर्श्यते। अस्याधिकरणस्य



पूर्वाधिकरणं भूमाधिकरणम्। पूर्वस्मिन् भूमाधिकरणे सत्यशब्दः ब्रह्मणि रूढ इति कृत्वा भूमा ब्रह्मैव इत्युक्तम्। तथा प्रकृताधिकरणेऽपि अक्षरशब्दो वर्णे रूढ इति दृष्टान्तसङ्गत्या अक्षरशब्दवाच्यो वर्ण इति पूर्वपक्षः क्रियत इति पूर्वाधिकरणेन साकमस्याधिकरणस्य दृष्टान्तसङ्गतिः। इदानीं पादसङ्गतिः प्रदर्श्यते। ''अक्षरमम्बरान्तधृतेः'' इति प्रथमसूत्रेण अम्बरान्तधृतिहेतुना अक्षरशब्दवाच्यं परं ब्रह्मेति सिद्धान्तः क्रियते। सा च अम्बरान्तधृतिः सौत्रो हेतुः अम्बरं ब्रह्मेति शङ्कया, धृतिर्न श्रुतेति च शङ्कया अभिभूतत्वात् अस्पष्ट इति अस्पष्टब्रह्मलिङ्गतेति पादसङ्गतिः। एवमधिकरणमिदं निर्गुणे ब्रह्मणि समन्वितमित्यपि पादसङ्गतिः। एवमस्योपनिषद्वाक्यस्य ब्रह्मणि समन्वयः क्रियत इति समन्वयाध्यायेन प्रथमाध्यायेन साकमस्याधिकरणस्य अध्यायसङ्गतिर्वर्तते। एवं ब्रह्मप्रतिपादकत्वेन शास्त्रसङ्गतिर्वर्तते। एवं प्रकृतश्रुतिवाक्येन परं ब्रह्म प्रतिपाद्यत इति श्रुतिसङ्गतिरपि वर्तते।

एवञ्च प्रकृतश्रुतिवाक्ये अक्षरशब्दवाच्यः वर्णो वा उत परमेश्वर इति संशये प्राप्ते सति, ''अक्षरसमाम्नाय'' इत्यादौ अक्षरशब्दस्य वर्णे प्रसिद्धत्वात् प्रसिद्ध्यतिक्रमस्य चायुक्तत्वात् वर्ण एवाक्षरशब्दवाच्य इति प्राप्तः। एवम् ''ओङ्कार एवेदं सर्वम्'' इत्यादौ च श्रुत्यन्तरे वर्णस्यापि उपास्यत्वेन सर्वात्मकत्वावधारणात् वर्ण एवाक्षरशब्दवाच्य इति पूर्वपक्षः।

एवं पूर्ववक्षे प्राप्ते सिद्धान्त उच्यते। पर एवात्मा अक्षरशब्दवाच्यः, न तु वर्णः। कस्मात्–''अक्षरमम्बरान्तधृतेः'' इति। इदं प्रथमं सिद्धान्तसूत्रम्। अम्बरान्तधृतेः इति हेतुः। अक्षरं परं ब्रह्मैव, पृथिव्यादेः आकाशान्तस्य विकारजातस्य धारणात् इति सूत्रस्यार्थः। प्रकृतोपनिषदि पृथिव्यादेः समस्तस्य विकारजातस्य कालत्रयविभक्तस्य **''आकाशे तदोतं च प्रोतं च''**[2] इत्याकाशे प्रतिष्ठितत्वमुक्तम् आदौ। अनन्तरं **''कस्मिन्नु खलु आकाशः ओतश्च प्रोतश्च''**[3] इत्यनेन प्रश्नेन इदमक्षरमवतारितम्–''स होवाच एतद्वै तदक्षरं गार्गि'' इत्यादिना। तथा चोपसंहृतम्–**''एतस्मिन्नु खल्वक्षरे गार्गि आकाशः ओतश्च प्रोतश्च''**[4] इति। पृथिव्या आरभ्य आकाशपर्यन्तं समस्तस्य विकारजातस्य धारणं सर्वात्मके ब्रह्मण्येव सम्भवति, न त्वन्यत्र। अतोऽक्षरं परं ब्रह्मैव। यदपि ''ओङ्कार एवेदं सर्वम्'' इति श्रुत्वा ओङ्कारस्यापि सर्वात्मकत्वोक्त्या ओङ्कारात्मकवर्ण एव अक्षरशब्दवाच्य इत्युक्तम्, तन्न। तच्च कथनं ब्रह्मप्रतिपत्तिसाधनत्वात् स्तुत्यर्थं द्रष्टव्यम्।

तस्मात् रूढ्या अक्षरशब्दवाच्यः वर्ण इति वक्तुं न शक्यते। किन्तु रूढिं परित्यत्य न क्षरतीत्यक्षरम्, अश्नुते इति चाक्षरम् इति यौगिकव्युत्पत्त्या नित्यत्वव्यापित्वाभ्याम् अक्षरशब्द-वाच्यं परं ब्रह्मैव।

ननु कार्यस्य कारणाधीनत्वमिति सिद्धान्तमनुसृत्य अम्बरान्तधृतिहेतुना अक्षरशब्दवाच्यं परमेव ब्रह्मेति यदुक्तं तन्न युक्तम्, सांख्याभिमतप्रधानस्यापि अस्याः अम्बरान्तधृतेः सम्भवात्। ''प्रकृतेर्महान्'' इत्यादिना सांख्यैः महदादित्रयोविंशतिविकारजातस्य प्रधानादेवोत्पत्तेरङ्गीकारात्। अतः पृथिव्यादेराकाशान्तस्य विकारजातस्य धृतिः प्रधानेऽपि सम्भवतीति अक्षरशब्दवाच्यं प्रधानमेव स्यादिति चेत्–

अत्रोच्यते। ''सा च प्रशासनात्'' इति द्वितीयं सूत्रम्। सा च अम्बरान्तधृतिः परमेश्वरस्यैव कर्म, नाचेतनस्य प्रधानादेः। कस्मात्–प्रशासनात्। प्रशासनं हीह श्रूयते। **''एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ निष्ठतः''**[5] इत्यादि। विधृतौ इत्यस्य विषयत्वेन धृतौ इत्यर्थः। प्रशासनञ्च चेतनस्यैव सम्भवतीति तच्च प्रशासनं पारमेश्वरं कर्म। नाचेतनस्य प्रधानादेः प्रशासनं सम्भवति। नह्यचेतनानां घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति।

''अन्यभावव्यावृत्तेश्च'' इति तृतीयं सूत्रम्। अन्यभावव्यावृत्तेश्च कारणात् ब्रह्मैव अक्षरशब्दवाच्यम्, नान्यत्। किमिदमन्यभावव्यावृत्तेरिति चेदुच्यते। अन्यस्य भावः अन्यभावः। तस्माद्व्यावृत्तिः अन्यभावव्यावृत्तिरिति। एतदुक्तं भवति। यदन्यद् ब्रह्मणः अक्षरशब्दवाच्यत्वम् इहाशङ्क्यते तद्भावात् इदमम्बरान्तविधारणमक्षरं व्यावर्तयति श्रुतिः– **''तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ, अश्रुतं श्रोतृ, अमतं मन्तृ, अविज्ञातं विज्ञातृ''**[6] इति। तत्रादृष्टत्वादिव्यपदेशः प्रधानस्यापि सम्भवति। द्रष्टृत्वादिव्यपदेशस्तु न तस्य सम्भवति, अचेतनत्वात्।

ननु प्रधानस्याचेतनत्वात् मास्तु अक्षरशब्दवाच्यत्वम्। चेतनो जीव एवाक्षरशब्दवाच्यो भवतु इति चेत् उच्यते। **''नान्यदतोऽस्ति द्रष्टृ, नान्यदतोऽस्ति श्रोतृ, नान्यदतोऽस्ति मन्तृ, नान्यदतोऽस्ति विज्ञातृ''**[7] इत्यादिश्रुत्या आत्मभेदप्रतिषेधात् न शारीरस्यापि उपाधिमतो जीवस्य अक्षरशब्दवाच्यत्वम्। ''नान्यत्'' इत्यादिकया हि श्रुत्या आत्मभेदः प्रतिषिध्यते। तथा चोपाधिभेदात् भिन्ना जीवा निषिद्धा भवन्ति। अभेदाभिधानात् इत्यर्थ इति भामती।

इतोऽपि न शारीरस्य जीवस्याक्षरशब्दवाच्यता इत्युच्यते। तथा हि–**अचक्षुष्कम-श्रोत्रमवागमनः**[8] इति। तस्याक्षरशब्दवाच्यस्योपाधिमत्ताप्रतिषेधात्। अन्तःकरणोपाधिकश्च जीवः। अतो जीवः उपाधिमानिति कृत्वा सः नाक्षरशब्दवाच्यः।

अत्र भामत्यामेवमुक्तम्। ''अक्षरस्य चक्षुराद्युपाधिं वारयन्ती श्रुतिः औपाधिकस्य



जीवस्य अक्षरतां निषेधतीत्यर्थः। तस्माद्वर्णप्रधानाव्याकृतजीवानामसम्भवात्, सम्भवाच्च परमात्मनः परमात्मैवाक्षरमिति सिद्धम्'' इति।

ब्रह्मविद्याभरणे एवमुक्तम्। ''यथा पटः दीर्घभावेन तन्तुष्वोतः, तिर्यग्भावेन च तत्रैव प्रोतः, एवमाकाशः कस्मिन्नोतश्च प्रोतश्चेति गार्ग्या पृष्टस्य याज्ञवल्क्यस्य प्रतिवचनम्– **''एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनणु''**[9] इत्यादि इति।

ब्रह्मसूत्रभाष्यप्रदीपिकायामस्मद्गुरुचरणैः ब्रह्मीभूतैः महामहोपाध्यायैः गोडा सुब्रह्मण्यशास्त्रिमहाभागैः पूर्वपक्षसिद्धान्तयोरनुमानप्रकारः एवं प्रोक्तः।

अक्षरशब्दप्रतिपाद्यः ओङ्कारात्मकवर्णः शक्तिसम्बन्धेनाक्षरशब्दवत्त्वात्। ओङ्कार एवेदं सर्वमिति श्रुत्या सर्वात्मकत्वेन उपास्यत्वादिति।

अक्षरशब्दप्रतिपाद्यं, परं ब्रह्मैव, अम्बरान्तधारणानुकूलप्रशासनवत्त्वादिति सिद्धान्तः। अम्बरान्तधारणमात्रस्य हेतुत्वे प्रधाने व्यभिचारः स्यात्। परब्रह्मत्वरूपसाध्याभाववति प्रधाने अम्बरान्तधारणरूपहेतोस्सत्त्वात्। साध्याभावद्वृत्तिहेतुत्वस्य व्यभिचारत्वात्। अम्बरान्तधारणानुकूलप्रशासनस्य हेतुत्वे तस्य चेतनधर्मत्वात् अचेतनप्रधानावृत्तित्वान्न व्यभिचारः। एवञ्च ज्ञेयब्रह्मणि समन्वय इति गार्गिब्राह्मणं निर्गुणाक्षरे समन्वितमिति सिद्धम्। पूर्वपक्षे ओङ्कारोपासनं फलम्। सिद्धान्ते निर्गुणब्रह्मोपासना फलम्।

***

## सन्दर्भाः


1. बृह., 3/8/7,8
2. बृह., 3/8/4
3. बृह., 3/8/7
4. बृह., 3/8/11
5. बृह., 3/8/9
6. बृह., 3/8/11
7. बृह., 3/8/11
8. बृह., 3/8/8
9. बृह., 3/8/8


***